मोहरिते सच्चवयणस्स पलिमंथू ( ठाणंगसुत्त, ५२९ )

श्री हेमचन्द्राचार्य

# अनुसंधान

प्राकृतभाषा अने जैनसाहित्य विषयक संपादन, संशोधन, माहिती वगेरेनी पत्रिका

संपादक : विजयशीलचन्द्रसूरि

५०



कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी

स्मृति संस्कार शिक्षणनिधि, अहमदाबाद

2009

Jain Education International
www.jainelibrary.org

मोहरिते सच्चवयणस्स पलिमंथू ( ठाणंगसुत्त, ५२९ )
'मुखरता सत्यवचननी विघातक छे'

# अनुसंधान

प्राकृतभाषा अने जैनसाहित्य-विषयक
सम्पादन, संशोधन, माहिती वगेरेनी पत्रिका

५०

सम्पादकः
विजयशीलचन्द्रसूरि



श्रीहेमचन्द्राचार्य

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी
स्मृति संस्कार शिक्षणनिधि
अहमदाबाद
२००९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुसन्धान ५०

आद्य सम्पादक: डॉ. हरिवल्लभ भायाणी

सम्पादक: विजयशीलचन्द्रसूरि

सम्पर्क: C/o. अतुल एच. कापडिया
A-9, जागृति फ्लेट्स, पालडी
महावीर टावर पाछळ
अमदावाद-३८०००७
फोन : ०७९-२६५७४९८१

प्रकाशक: कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम
जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि,
अहमदाबाद

प्राप्तिस्थान: (१) आ. श्रीविजयनेमिसूरि जैन स्वाध्याय मन्दिर
१२, भगतबाग, जैननगर, नवा शारदामन्दिर रोड,
आणंदजी कल्याणजी पेढीनी बाजुमां,
अमदावाद-३८०००७

(२) सरस्वती पुस्तक भण्डार
११२, हाथीखाना, रतनपोल,
अमदावाद-३८०००१

मूल्य: Rs. 120-00

मुद्रक:
क्रिश्ना ग्राफिक्स, किरीट हरजीभाई पटेल
९६६, नारणपुरा जूना गाम, अमदावाद-३८००१३
(फोन: ०७९-२७४९४३९३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शनप्रभावक श्रुतस्थविर

**पूज्य मुनिराज श्री जम्बूविजयजी महाराज**

जेमनी पुण्यस्मृतिमां

**'अनुसन्धान'-५० (१-२)**

समर्पित छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## आवरणचित्र-परिचय

आ अंकमां 'मल्लिनाथ रास' छपायो छे. तेना कर्ता कवि ऋषभदास खम्भातना वीशा पोरवाड ज्ञातिना जैन श्रावक हता. तेमनुं पोतानुं काष्ठशिल्पकलामण्डित घर-देरासर हतुं. ते देरासर आजे पण खम्भातमां अने माणेकचोकमां ज अन्य नूतन मन्दिरमां आधुनिक रीते गोठवायेलुं विद्यमान छे. तेना उपरना भागमां पार्श्वनाथयुक्त पद्मावतीदेवीनी काष्ठ-प्रतिमानुं आ दृश्य छे. १७मा सैकानी उत्कृष्ट काष्ठकलानो आ श्रेष्ठ नमूनो छे.

टाइटल ४ उपर मूकेल चित्र ते पित्तलनी दीपदानीना तसवीर छे. गणदेवीमांथी उपलब्ध आ दीपदान तेनी प्रसन्न कलात्मक मुद्राने कारणे आकर्षणनुं केन्द्र बने छे. आ कलाकृति केटली प्राचीन हशे तेनो अन्दाज आवतो नथी, पण पुराणी होवा विषे कोई शंका नथी.

## विशेष निवेदन

अनुसन्धाननो आ पचासमो अंक, दर्शनप्रभावक श्रुतस्थविर प्रवर्तक मुनिराज श्रीजम्बूविजयजीनी पुण्यस्मृतिमां सादर अंजलिरूपे प्रगट करवामां आवे छे. बे विभागमां छपानारा आ अंकना द्वितीय विभागमां तेमना विषे अंजलिरूप सामग्री आपवामां आवशे, तेनी नोंध लेवा सुज्ञ जनोने विनति.

**शी.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# निवेदन

## 'अनुसन्धान'नुं ऐतिह्य

मारी सामे अनुसन्धानना १ थी ४९ अंको पड्या छे. मनमां एवुं ऊग्युं छे के आ सामयिक के अनियतकालिक पत्रिकानी कथा आलेखुं; एने माटे अंकोनो आ ढगलो करीने बेठो छुं. अढारे वर्षे, सगीर अवस्थामांथी बहार नीकळीने यौवनना उंबरे डग भरती पत्रिका परत्वे, आवुं अवलोकन करवानुं साव अप्रस्तुत तो नहीं ज गणाय, एवा ख्यालथी आ प्रारम्भुं छुं.

★

ई. १९९३नी आ वात छे. श्रीभायाणी साहेब उपाश्रये मने अपभ्रंश भाषा शीखववा माटे रोज आवता हता. वात हती सप्ताहमां बे वार आववानी. पण तेओ लगभग रोज आवता. समय अर्धा-पोणा कलाकनो नक्की करेलो. बेसे ने वातो चाले बे-अढी कलाक. विश्व भरना साहित्यनी, भाषाओनी, विद्वानोनी, विद्वानोनां कार्योनी अनेक वातो तेओ करे, अने आपणने प्रतीति करावे के भौतिक दुनियानी कोई पण बाबत करतां विद्याप्रीति तथा विद्याकार्य जराय ओछुं के हलकुं-नकामुं-बिनउत्पादक नथी.

आ सत्संग दरमियान ज एमणे एक दिवस वात उपाडी के "प्राकृत भाषा-साहित्य तथा जैन साहित्य विषे जे पण थोडुंघणुं काम थई रह्युं छे, तेनो विद्वज्जगत्ने ख्याल आवे के व्यापक वर्गने जाणकारी मळे तेवुं एक सामयिक प्रगट थवुं जोईए. कोई जैन संस्थाने आवुं काम करवानुं मन केम नथी थतुं ? आ एक बहु आवश्यक कार्य छे."

में आ सूचनना ऊंडाणमां ऊतरीने तेना आकार-प्रकार वगेरे विषे समजवानी जिज्ञासा व्यक्त करी, तो तेमणे सूचव्युं : 'अनुसन्धान' नाम रखाय. अनियत-कालिक होय. मोटा शोध-सामयिकनो फटाटोप न राखतां माहिती-पत्रिकानुं स्वरूप आपी शकाय. तेमां संशोधन-प्रकाशननां कार्यो ज्यां ज्यां चालतां होय, जे व्यक्ति के संस्था करती होय, तेनी विगतो भेगी थाय एटले अंक करवानो. महत्त्वनी वात नाणांकीय रोकाणनी छे, अने वितरण व्यवस्थानी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छे. ए माटे कोई संस्था तैयार थवी जोईए.

में तेज क्षणे ते प्रस्तावने वधावी लेतां कह्युं : नाणांकीय तथा व्यवस्था बन्ने जवाबदारी 'हेमचन्द्राचार्य ट्रस्ट' संभाळशे, पण पत्रिकाना सम्पादन-संकलननी जवाबदारी तमे स्वीकारो तो ज. नाम तमारुं आवशे, बीजानुं नहीं. एमां लेखो लखवा, अन्यना लेख मेळववा, ए बधी बाबतो तमारे जोवानी. कोने कोने अंक मोकलवा, ते पण तमारे नक्की करी आपवानुं. लवाजम राखवानुं नहीं, निःशुल्क ज बधे मोकलवाना.

आ रीते नक्की थयुं - अनुसन्धाननुं प्रागट्य. मारी आ विषये कोईज आवडत के सज्जता नहि, छतां तेमणे पहेला अंकथी ज मारुं नाम मूक्युं. केम ? तो मारी नम्र समजण मुजब, कोई पण जैन संस्था आवा विलक्षण कार्यमां नाणां खरचवा तैयार न थाय तेवा वातावरणमां, मारा सूचनथी एक संस्था तैयार थई तेना ऋणस्वीकारनी भावनाथी तेमणे मारुं नाम लख्युं, जे योग्य के अयोग्य रीते पण, आज लगी चालु रह्युं छे. मने तो, एक मूर्धन्य विद्वज्जन द्वारा सूचित, मजाना के मूल्यवान् विद्याकार्यना निमित्त बनवानो मोटो परितोष हतो.

हवे एक योगानुयोग एवो थयो के ए ज अरसामां अमारे 'श्रीहेमचन्द्राचार्य ट्रस्ट'ना आश्रये, पं. दलसुखभाई मालवणिया तथा श्री हरिवल्लभ भायाणीनुं, 'हेमचन्द्राचार्य चन्द्रक' प्रदान करीने, बहुमान करवानुं हतुं. एटले पछी निश्चित थयुं के पत्रिकानो पहेलो अंक ते बहुमानना दिने ज प्रकाशित करवो. तरत ज तैयारी आदरी, अने बहु ज थोडा दहाडामां, ४२ पृष्ठोनो प्रथम अंक निर्धार्या प्रमाणे नियत समये प्रकाशित थई शक्यो. अे तैयार करवामां पण दृष्टि अने महेनत-बधुं भायाणी साहेब अने तेमना विद्यार्थी डॉ. कनुभाई शेठ वगेरेनुं ज हतुं, ते आ तके स्वीकारवुं जोईए.

प्रथम अंकना मुखपृष्ठ पर, पत्रिकानुं 'सूत्र' अने पत्रिकानो उद्देश, तेमणे आ प्रमाणे लख्या :

(१) Logo : 'मोहरिते सच्चवयणस्स पलिमंथू' - मुखरता सत्यवचननी विघातक छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२) Object : प्राकृत भाषा अने जैन साहित्यविषयक सम्पादन, संशोधन, माहिती वगेरेनी पत्रिका.

आ बन्ने वाक्यो पत्रिकाना आवरणपृष्ठ पर नियमित प्रगट थतां रह्यां छे.

१९९३ मां बे ज अंको थया हता. तेमां प्रथम अंक जोया पछी, अने ते जे जे व्यक्तिओ वगेरेने मोकलवामां आवेल तेनी यादी जोया पछी, मने ऊगेलो विचार में भायाणीजीने कह्यो के "आ पत्रिकानी भाषा गुजराती भले होय, पण तेनी लिपि देवनागरी राखीए. केम के देश-परदेशना अनेक विद्वानोने गुजराती लिपि उकेलवामां कष्ट थाय, पण नागरी लिपिमां ओछी तकलीफ थशे, अने तो तेओ वधु नहि तो पण, कृतिना सारांशने तो पकडी ज शकशे."

आ सूचन भायाणीजीने बहु गम्युं, अने फलत: बीजा ज अंकथी पत्रिकानी लिपि नागरी लिपि थई गई. अमारा आ प्रयोगने देशना तेम विदेशना अनेक विद्वानोए वखाणेलो, अने ते विषे पत्रो पण लखेला.

अंक क्रमाङ्क १७ पर्यन्त भायाणीजी आ पत्रिका साथे संकळायेला रह्या. छेल्ला ३-४ अंकोथी, जो के, तेमणे मोटा भागनी जवाबदारी छोडी दीधी हती. छतां तेमना लेखो, मार्गदर्शन वगेरे मळतां ज रह्यां. सत्तरमो अंक श्रीदलसुखभाई मालवणियानी स्मृतिमां कर्यो, ते तेमना हस्तक थयेलो छेल्लो अंक. ए पछी नवेम्बर ११, २०००मां भायाणीसाहेबनुं निधन थतां १८मो अंक २००१मां, तेमनी स्मृतिमां कर्यो, अने त्यारथी तमाम जवाबदारी मारा पर आवी.

'अनुसन्धान' अनियतकालिक पत्रिका तो छे ज, अनरजिस्टर्ड पत्रिका पण छे. तेनो एकमात्र उद्देश स्वाध्याय, संशोधन अने जाणकारी (माहिती) छे, अने तेने माटे सरकारी लायसन्स लईने अनेकविध आंटीघूंटीना कळणमां फसावानी कोई ज इच्छा अमारी नहोती/नथी. आ पत्रिकानो प्रकाशन-आंक आवो रह्यो छे :

ई. १९९३/२, १९९४/१, १९९५/२, ९६/२, ९७/३, ९८/२, ९९/३, २०००/२, २००१/१, २००२/३, २००३/५, २००४/४, २००५/४, २००६/३, २००७/५, २००८/४, २००९/३. सत्तर वर्ष अने ४९ अंको. अढारमा वर्षे तेनो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पचासमो अंक थई रह्यो छे ते, ओछामां ओछुं मारा माटे, अने आमां रस लेनारा दरेक माटे, एक आनन्दनो तेम आश्वस्ततानो एहसास करावी जाय छे.

अनुसन्धानने अनेक मान्य-मूर्धन्य विद्वज्जनोनां अभिनन्दन सांपड्यां छे. कविवर मकरन्द दवे पण आमां ऊंडो रस लेता हता. तो अनेक विद्वानोनो सहयोग पण अनुसन्धानने मळ्यो छे. तेमां पण श्रीहरिवल्लभ भायाणी अने श्री जयन्त कोठारी - ए बेनी शब्दचर्चाओ ए आ पत्रिका माटे अलंकरण जेवी सामग्री बनती रही हती. डॉ. के.आर.चन्द्र, डो. ढांकी, डो. नगीन शाह वगेरे धुरन्धर विद्वानोनी पण कलम-प्रसादी आ पत्रिकाने मळी छे.

अफसोस एटलो ज के ए विद्वानोनी गेरहाजरीमां ए प्रकारनी शास्त्रीय शब्दचर्चा करे तेवा कोई विद्वान हवे रह्या नथी, अथवा एवा लेखोथी अनुसन्धान हवे वंचित रहे छे.

अनुसन्धानने प्राकृत, संस्कृत, अपभ्रंश, जूनी (मध्यकालीन) गुजराती इत्यादि भाषाओनी अनेक अप्रगट रचनाओने प्रकाशमां आणी छे. ए रचनाओ महदंशे पद्यात्मक छे. केटलीक गद्य पण खरीज. अनेक ऐतिहासिक तथ्यो 'टूंक नोंध' तथा अन्य लेखो द्वारा उजागर कर्यां छे. अनेक प्रकाशनो विषे माहिती पीरसी छे.

आचार्य हरिभद्रसूरिनी रचेली 'धूमावली' जेवी अप्रगट - अज्ञात लघु रचनाओ होय, योगीराज आनन्दघननी अप्रगट-अज्ञात रचना होय, कवि ऋषभदासे रचेल-स्वहस्ते लखेल रास होय, तेने प्रकाशित करवानुं श्रेय अनुसन्धानने फाळे जाय छे. 'पञ्चसूत्र' ए आ. हरिभद्रसूरिनी पोतानी रचना छे, चिरन्तन आचार्यनी नहि, ते पुरवार करवानो यश पण अनुसन्धानने ज मळ्यो छे.

जैन मुनिओनी वात करुं तो उपाध्याय भुवनचन्द्रजीए आ पत्रिकामां हमेशां ऊंडो रस लीधो छे. तेमनुं 'विहंगावलोकन' आ पत्रिकानुं घरेणुं छे. अनुसन्धाननी सामग्रीमां क्यां केटली ने केवी भूल छे, ते बहुज प्रेमपूर्वक तेओ तेमां नोंधे छे, चींधे छे; अने अमे पण तेने एटला ज प्रेमपूर्वक, कशाये फेरफार-कापकूप विना छापीए छीए. खेद एटलो ज के बीजा जैन मुनिराजो हजी आमां जोईए तेटलो ऊंडो रस लेता नथी.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुसन्धानना १९मा अंक पछी, एकबे अंकोने बाद करतां दरेक अंकनां उपरणां पर विभिन्न चित्रो मूकवामां आवे छे, जेने लीधे अंको रमणीय बने छे. मोटा भागे तेनो परिचय पण आपवामां आवे छे.

अनुसन्धानना सम्पादक तरीके क्वचित् साहित्यना/विद्याना/संशोधनना क्षेत्रे थती अनेक जाणवा मळती गरबडो परत्वे चिन्तनात्मक के सत्यनिवेदनात्मक लखाणो पण लखवानुं आव्युं छे. तेवे वखते कोईनाय प्रत्ये द्वेष, दंश, दुर्भाव लाव्या-राख्या विना, शुद्ध विद्याप्रीतिरूपे, जे कहेवानुं होय ते, गांठोगळफो राख्या वगर कही शकायुं छे, तेनो आनन्द पण छे. आ कारणे, सम्बन्धित व्यक्तिओने माठुं पण लाग्युं होवानुं जणायुं छे, परन्तु, तेनी सामे, निष्पक्ष अने मान्य विद्वज्जनो तथा विचारशील लोकोनो सानुकूल प्रतिभाव, बहु मोटा प्रमाणमां सांपड्यो छे, एम पण जाहेर करवुं जोईए.

अनुसन्धान एक आनन्ददायक विद्याकीय प्रवृत्ति छे. तेणे-तेना माध्यमथी मने घणुं घणुं शीखवा मल्युं छे. घणा विद्वानो तथा साहित्यकारोनो सम्पर्क करावी आप्यो छे. तो, आ पत्रिकाना कारणे मारा साथी साधुजनो तथा अमुक साध्वीजीओ पण हस्तलिखित पोथीओ वांचतां, नकल करतां तथा सम्पादन करतां शीख्यां छे. आ बधो लाभ घणो महत्त्वनो लागे छे.

अन्तमां अमारा प्रकाशक एवा ट्रस्टने पण संभारी लऊं. 'हेमचन्द्राचार्य ट्रस्ट तथा तेना ट्रस्टीओ शेठ पंकजभाई वगेरेए हमेशां आ पत्रिकाना काममां पूरो सहकार आप्यो छे. क्यारेक अंकमां विलम्ब थयो होय तो उघराणी पण करी छे के केम आ वखते अंक नथी कर्यो ?

तो क्रिष्ना ग्राफिक्सना हरजीभाई पटेल, किरीट पटेलनो पण मुद्रणना कार्यमां चीवटभर्यो सहयोग रह्यो छे. भायाणीजीए तेमना पर मूकेलो विश्वास सार्थक ठरे तेवी तेमनी काळजी होय छे.

अनुसन्धानना अंकोमां आज पर्यन्त प्रकाशित सामग्रीनी एक वर्गीकृत तालिका अवसरे तैयार करी आपवानी इच्छा छे.

तो आ छे अनुसन्धाननुं ऐतिह्य.

– शी.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमणिका

खण्डेल्लकगच्छीय श्री शान्तिसूरि-विरचिता
भक्तामरस्तव - वृत्तिः ।। — सं. विजयशीलचन्द्रसूरि — १

अज्ञातकर्तृका
भक्तामरस्तव-सुखबोधिका वृत्तिः — सं. विजयशीलचन्द्रसूरि — २४

श्री विवेकचन्द्रगणि कृतम्
भक्तामरस्तोत्र-पादपूर्ति आदिनाथ-स्तोत्रम् — सं. विनयसागर — ३७

भवनभूषण-भूषणभवन काव्य — सं. उपा. भुवनचन्द्र — ४३

धर्मरत्नदुर्लभत्वम् — सं. मुनिकल्याणकीर्तिविजय — ५४

त्रिभाषामयी श्रीनेमिसूरीश्वरस्तुतिः — सं. मुनिकल्याणकीर्तिविजय — ६३

एक विज्ञप्तिपत्र — सं. मुनित्रैलोक्यमण्डनविजय — ६५

श्री पद्मानन्दसूरि रचित श्रावक-विधि रास — म. विनयसागर — ९३

श्रीदेवचन्द्रमुनिकृत
तेजबाई व्रतग्रहण सज्झाय — सं. मुनिसुजसचन्द्र-सुयशचन्द्रविजयौ — १०१

कवि ऋषभदास कृत
श्रीमल्लिनाथनो रास — सं. साध्वी दीप्तिप्रज्ञाश्री — १११

सुश्री कौमुदी बलदोटा - लिखित
'' 'नारद' के व्यक्तित्व के बारे में जैन
ग्रन्थों में प्रदर्शित संभ्रमावस्था''
इस शोधपत्रके बारे में कुछ विचार — मुनि कल्याणकीर्तिविजय — १४२

ग्रन्थपरिचय :
'तर्करहस्यदीपिका' नो अनुवाद — उपा.भुवनचन्द्र — १४५

माहिती :
नवां प्रकाशनो — १४७

Jain Education International — For Private & Personal Use Only — www.jainelibrary.org

## खण्डेल्लकगच्छीय श्री शान्तिसूरि-विरचिता

# भक्तामरस्तव - वृत्तिः ॥

सं. विजयशीलचन्द्रसूरि

केटलाक समय अगाऊ डॉ. मधुसूदन ढांकीए सूचवेलुं : भक्तामर पर शान्तिसूरिकृत एक टीका खम्भातमां छे, ते उपलब्ध टीकाओमां सौथी प्राचीन छे. तेने प्रकाशित करवानी जरूर छे. आ सूचनने याद राखीने आ वखतनी खम्भातनी स्थिरतामां आ टीकानी प्रतिलिपि ऊतारी छे, अने ते अत्रे प्रकाशित करवामां आवे छे.

खण्डेल्लक गच्छ अने शान्तिसूरि - आ बन्ने नामो टीकाना अन्तभागमां उल्लेखायेलां छे. श्रीशान्तिसूरिना सत्ताकाल विषे कोई सन्दर्भ उपलब्ध नथी. परन्तु टीकानी निराडम्बर शैली अने शब्दोना अर्थ तेमज प्रश्नोत्तरीरूपे तेनी प्रस्तुति वगेरे जोतां १२मा शतकथी अर्वाचीन ते होय तेम जणातुं नथी.

खम्भातना शान्तिनाथ प्राचीन ताडपत्र ग्रन्थभण्डारमां क्र. २७८ पर स्थित आ टीका-प्रति २८ पत्रोनी छे. तेनी लखावट उपरथी तेओ आनुमानिक लेखन संवत् विक्रमनो १५मो शतक होवानुं पूज्य श्रीपुण्यविजयजी महाराजे निर्देश्युं छे (Catalogue of Palm-leaf MSS. in the Shantinatha Jain Bhandara, Cambay : सं. मुनि पुण्यविजयजी, प्र. गायकवाड्झ ओरिएन्टल सिरीझ, बरोडा - नं. १४९, ई. १९६६, पृ. ४३२)

बे-एक ठेकाणे टीकांशो त्रुटित छे. एक पानुं फाटेल होवाथी पाठ तूटेलो छे. ते सिवाय बधी - ४४ गाथाओ तथा तेनी टीका परिपूर्ण रूपमां उपलब्ध छे. १५मुं काव्य तेमज तेनी अवतरणिकारूप टीकांश, लखायेल नथी. ते पैकी काव्य तो प्रचलित पाठ परम्परा प्रमाणे लखीने उमेरेल छे.

केटलांक पद्योमां नानकडा पण पाठभेदो जोवा मळे छे, तेनी नोंध आ प्रमाणे : पद्य १०नुं प्रथम चरण, प्रचलित परम्परामां "**नात्यद्भुतं भुवनभूषणभूत ! नाथ !**" आम बोलाय छे. ज्यारे अहीं ते चरण "**नात्यद्भुतं भुवनभूषण ! भूतनाथ !**" ए प्रमाणे आलेखायुं छे. '**भूतनाथ**'नी टीका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'**प्राणिप्रभो !**' एम करवामां आवी छे.

पद्य १२ मां प्रथम चरण "**यैः शान्तरागरुचिभिः परमाणुभिस्त्वं**" ए प्रमाणेनो पाठ प्रचलित छे. आ टीका प्रमाणे ते पाठ "**यैः शान्तराग ! रुचिभिः परमाणुभिस्त्वं**" एम छे. '**हे शान्तराग !-वीतराग**', तथा '**रुचिभिः -दीप्तिमद्भिः**' एवी त्यां टीका पण छे.

पद्य २०मां त्रीजुं चरण आ प्रमाणे प्रचलित छे : "**तेजः स्फुरन्मणिषु याति यथा महत्त्वं**'. परन्तु आ टीकामां ते स्थाने "**तेजो महामणिषु याति यथा महत्त्वं**" एम पाठ छे. तेनी टीका पण-'**महामणिषु-महारत्नेषु-इन्द्रनीलादिषु**' एवी छे.

पद्य २५, प्रथम चरण "**बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्**" एम प्रचलित छे. ज्यारे अहीं "**बुद्धस्त्वमेव विबुधार्चित ! बुद्धिबोधात्**" एम पाठ जोवा मळे छे. तेनी टीकामां पण '**बुद्धिबोधात् - बुद्ध्या - केवलज्ञानेन सकलतत्त्वपरिच्छेदात्**', तथा '**विबुधार्चित ! - शक्रादिदेवसंघातपूजित !**' एम विवरण छे.

पद्य २७मां चोथा चरणमां "**कदाचिद् वीक्षितोऽसि**" पाठ छे, अने तेनी टीका पण ते ज पाठ प्रमाणे छे. ज्यारे प्रचलित पाठ '**कदाचिदपीक्षितोऽसि**' एम छे, जे बधी दृष्टिए उचित पण छे.

पद्य ३९मां "**वेगावतारतरणातुरयोधभीमे**" एम बीजुं चरण प्रसिद्ध छे. अहीं "**वेगावतारतरुणातुरयोधभीमे**" पाठ छे. तेनी टीकामां पण, '**वेगावतारेण-जवावतरणेन तरुणा-युवानः**' एम विवरण छे.

तो ते ज पद्यना चतुर्थ चरणमां "**०वनाश्रयिणो लभन्ते**" पाठ तो छे ज; पण टीकाकार तेनो पाठभेद आम नोंधे छे : "**०समाश्रयिण इति पाठः**".

प्रतिलिपि करवा देवा बदल खम्भातना शां.प्रा. जैन ताडपत्र भण्डारना कार्यवाहकोनो ऋणस्वीकार करुं छुं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## भक्तामर-वृत्तिः ॥

ॐ नमो वीतरागाय ॥

वृत्तिं भक्तामरादीनां स्तवानां वच्मि यथोचितम् ।
संक्षेपान्मुक्तिलाभाय सुखबुद्धिप्रबुद्धये ॥१॥

**भक्तामरप्रणतमौलिमणिप्रभाणा-मुद्योतकं दलितपापतमोवितानम् ।**
**सम्यक् प्रणम्य जिनपादयुगं युगादा-वालम्बनं भवजले पततां जनानाम् ॥१॥**

**यः संस्तुतः सकलवाङ्मयतत्त्वबोधा-दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः ।**
**स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारैः स्तोष्ये किलाऽहमपि तं प्रथमं जिनेन्द्रम् ॥२॥**

युगलम् ॥

अहमपि, न केवलमिन्द्रादयः स्तुतवन्तः । स्तोष्ये-स्तवं विधास्ये । किलेत्यात्मनोऽस(श)क्तिमौद्धत्यपरिहारार्थम् । चित्तहरैरुदारैरिति । मानतुङ्गाचार्य कविः । किं स्तोष्ये ? । तं जिनेन्द्रम् । रागादीनां जेतृत्वाज्जिनाः सामान्यकेवलिनः, तेषामिन्द्रः-प्रधानस्तीर्थंकरः । तं किम्भूतं ?। प्रथममाद्यमृषभनाथमित्यर्थः । यः किम्भूतः ? । संस्तुतः-सम्यग्-भक्तिबहुमानपुरस्सरम्; भगवदतिसा(शा)यिगुण-परिज्ञानपूर्वकं वा स्तुतो-नुतो-वन्दितः । कैः कर्तृभिः ?। सुरलोकनाथैर्देवनिवास-प्रभुभिरिन्द्रैः । कीदृशैः ?। उद्भूतबुद्धिपटुभिः । प्रादुर्भूता या बुद्धिर्मतिस्तया पटवो दक्षा विद्वांसस्तैः । कुत ईदृशैः ?। सकलवाङ्मयतत्त्वबोधात् । वाचा निर्वृत्तं वाङ्मयं शास्त्रजातम् । सकलं च तद् वाङ्मयं च सकलवाङ्मयं, तस्य तत्त्वं परमार्थः, तस्याऽवबोधो ज्ञानं । तस्मात् - शास्त्रावगमात् । कैः कृत्वा संस्तुतः ?, स्तोत्रैः-स्तवनैः । कीदृशैः ?, जगत्त्रितयचित्तहरैः । जगतां-भुवनानां त्रितयं-त्रयं, तस्य चित्तानि, तानि हरन्ति-रञ्जयन्तीति तानि तथोक्तानि । तैर्जगत्त्रये जन्तुमनआवर्जकैः, अत एवोदारैः-उदारार्थैरुद्भटैर्वा । किं कृत्वा स्तोष्ये ?, प्रणम्य-प्रकर्षेण नत्वा । कथं ?, सम्यग् बहुमानयुक्तम्; गुणावबोधसहितं वा । किं तद् ?, जिनपादयुगं - वीतरागचरणयुगलम् । कीदृशं ?, आलम्बनं-आश्रयणं । केषां ?, जनानां-लोकानां -प्राणिनामित्यर्थः । किं कुर्वतां ?,पततां-अधो गच्छतां-निमज्जतां । क्व ?, भवजले । भवन्ति-उत्पद्यन्ते कर्मायत्ता जन्तवो यस्मिन् सं.(स) भवः-संसारः । स एव जलं-संसारोदकं तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कस्मिन् काले जिनपादयुगमालम्बनम् ?; युगादौ - अवसर्पिणीसमयतृतीयारक-पर्यन्तकाले । कीदृशम् ?, उद्योतकं-उद्दीपकं-विस्फारकम् । कासां ?, भक्तामरप्रणतमौलिमणिप्रभाणाम् । भक्ता-भक्तिमन्तो ये अमरा-देवाः, तेषां प्रणता-नम्रीकृता एव मौलयः-शिरोमुकुटानि तेषु मणयो-रत्नानि इन्द्रनीलादीनि, तेषां प्रणता-नम्रीकृता एव मौलयः-शिरोमुकुटानि तेषु मणयो-रत्नानि इन्द्रनी लादीनि, तेषां प्रभा-दीप्तयोऽनेकवर्णाः तासां, भगवत्पादयुग्मस्याऽतिदीप्तिमत्त्वात् । तथा, दलितपापतमोवितानम् । दलितं-विध्वस्तः(स्तं) पापमेव-किल्बिषमेव तमोवितानोऽन्धकारविस्तारोऽपकारित्वाद् ये[न] ते(त)त्तथोक्तम् ॥१-२॥

साम्प्रतं 'किले'त्यनेन पदेनाभौ(नौ?)द्धत्यं सूचितमात्मनस्तदेव प्रकटयति-

**बुद्ध्या विनापि विबुधार्चितपादपीठ ! स्तोतुं समुद्यतमतिर्विगतत्रपोऽहम् ।**
**बालं विहाय जलसंस्थितमिन्दुबिम्ब-मन्यः क इच्छति जनः सहसा ग्रहीतुम् ?**
**॥३॥**

हे विबुधार्च्चितपादपीठ ! हे देवपूजितचरणासन ! भक्तिपरत्वात् प्रणतिसमये, देवद्रुमकुसुमैः, स्तोतुं-नवितुं, समुत्पद्यत (समुद्यत) मतिरुद्यमवद्बुद्धिः, अहं वर्त्ते । कीदृशः सन् ?, विगतत्रपोऽपगतलज्जः सन् । कथं स्तोतुं समुत्पद्यत (समुद्यत)मतिः?। विना-ऋतेऽपि, कया ? बुद्ध्या-सेमुख्या (शेमुष्या), बुद्धिरहितोऽपीत्यर्थः । यश्च बुद्धिरहितः स्तवे प्रवर्त्तते स निर्लज्जो भवत्येव । अत्राऽर्थेऽ**र्थान्तरन्यास**माह-कोऽन्योऽपरो जनो लोको विवेकी सहसा-झटिति ग्रहीतुमादातुमिच्छति-वाञ्छति ?, नैव कश्चित् । किं तद् ?, इन्दुबिम्बं-चन्द्रप्रतिमाम् । कीदृशम् ?, जलसंस्थितमुदकाश्रितम् । किं कृत्वा ?, विहाय-त्यक्त्वा । किम् ?, बालमज्ञं शिसुं(शुं)वा । स एव गृह्णातीत्यर्थः । तथा मां त्यक्त्वा जानानो न कोऽपि भगवद्गुणानां दुर्ल्लेपत्वात् स्तवे न प्रवर्तत इति ॥३॥

कुतो विगतलज्ज इत्याह -

**वक्तुं गुणान् गुणसमुद्र ! शशाङ्ककान्तान्, कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या,**
**कल्पान्तकालपवनोद्धतनक्रचक्रं, को वा तरीतुमलमम्बुनिधिं भुजाभ्याम्॥४॥**

कः क्षमः - सक्वो (शक्तः) ?, न कोऽपि । किं कर्तुं ?, वक्तुं - भाषितुम् । कान् ?, गुणान् ज्ञानादीन् । कस्य ? ते-तव । कीदृशोऽपि ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुरगुरुप्रतिमोऽपि-बृहस्पतितुल्योऽपि । कया ? बुद्ध्या-सेमुख्या (शेमुष्या) । हे गुणसमुद्र ! - गुणरत्नाकर ! । कीदृशान् ? शशाङ्ककान्तान् - चन्द्रवदुज्ज्वलान् । अत्रार्थेऽर्थान्तरन्यासमाह-को वा तरीतुं-प्लोतुं, अलं-समर्थः ?। नैव कश्चित् । कम् ? अम्बुनिधिं-समुद्रम् । काभ्याम् ? भुजाभ्यां-बाहुभ्याम् । कीदृशम् ? कल्पान्तकालपवनोद्धतनक्रचक्रम्, कल्पान्तकाले [आ]युक्षयसमये दर्शितम् ॥४॥

यद्येवं, तर्हि किमर्थं स्तवने प्रवृत्तः ? इत्याह-

**सोऽहं तथापि तव भक्तिवसा (शा)न्मुनीश !**
**कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः ।**
**प्रीत्याऽऽत्मवीर्यमविचार्य मृगो मृगेन्द्रं**
**नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥५॥**

यद्यपि वक्तुं गुणान् तव न कोऽपि शक्तः तथापि, सोऽहं विगतशक्तिरपि-सामर्थ्यहीनोऽपि । हे मुनीश ! - गणधरादिमुनिस्वामिन् ! । प्रवृत्तः-प्रवृत्तिमान् । किं ? कर्तुं - स्तवं विधातुम् । कस्य ? तव-भवतः । कुतः ? भक्तिवसा(शा)त् - आन्तरभावप्रेरितः सन् । अत्रार्थे **अर्थान्तरन्यास**माह- किं नाभ्येति ?-आभिमुख्येन किं न गच्छति ?। कोऽसौ ? मृगो-हरिणः । कम् ? मृगेन्द्रं-सिंहम् । गच्छत्येव । कया ? प्रीत्या-प्रणयेन । किं कृत्वा ? अविचार्य-अपर्यालोच्य । किं तद् ? आत्मवीर्यं-निजबलम् । किमर्थम् ? परिपालनार्थम् । कस्य ? निजशिशोः - आत्मीयबालस्य । यथा मृगो निजबालरक्षणार्थं सिंहाभिमुखं प्रवृत्तः, तथाऽहमपि स्तवं कर्तुं प्रवृत्त इति ॥५॥

नन्वल्पश्रुतस्य स्तवकरणे कथं मुखरता भवति ? इत्याह -

**अल्पश्रुतं श्रुतवतां परिहासधाम त्वद्भक्तिरेव मुखरीकुरुते बलान्माम् ।**
**यत् कोकिलः किल मधौ मधुरं विरौति तच्चारुचूतकलिकानिकरैकहेतुः ॥६॥**

त्वद्भक्तिरेव-भवत्सेवैव मां मुख(?) मुखरीकुरुते-वाचालयति । कुतः ? बलात्-हठात् कारण[तः] । कीदृशं माम् ? अल्पश्रुतं-स्वल्पशास्त्रावबोधम् । तथा परिहासधाम-चसूरीस्थानम् । केषाम् ? श्रुतवतां-बहुशास्त्रज्ञानां विदुषाम् । अत्रैवार्थेऽर्थान्तरन्यासमाह यत् कोकिलः-यस्मात् पिको मधौ-चैत्रे मधुरं-कर्णसुखदं चारु । किल प्रसिद्धौ । विरौति-नानाप्रकारं वक्ति । तच्चारुचूतकलिकानिकरैकहेतुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

- चारुश्चासौ चूतकलिकानिकरश्च स तथोक्तः, स एवैकहेतुः-अनन्यकारणं स तथा । तस्य विवरणस्य चारुकलिकानिकरैकहेतुः स तथोक्तः । वसन्ते किल कोकिलनानाशब्दना(न)स्य शोभनाऽऽम्रमञ्जरीसंघात एको हेतुर्यथा तथा मम स्तवनकरणे त्वद्भक्तिरेवैको हेतु(:) ॥६॥

ननु स्तवेन किं फलम् ? अत आह-

**त्वत्संस्तवेन भवसन्ततिसन्निबद्धं पापं क्षणात् क्षयमु[पै]ति शरीरभाजाम् ।**
**आक्रान्तलोकमलिनीलमशेषमाशु सूर्यांशुभिन्नमिव सा( शा )र्वरमन्धकारम् ॥७॥**

शरीरभाजां-प्राणिनां पापं-पातकं क्षणाद्-अल्पकालेन क्षयं-विनाशं उपैति-गच्छति । कीदृशम् ? भवसन्ततिसन्निबद्धं-जन्मपरम्परोपार्जितम् । केन केन हेतुना करणेन च ? त्वत्संस्तवेन-भवत्संस्तवनेन । उपमामाह-अन्धकारमिव-तम इव, यथा तमो विनाशं गच्छति । किम्भूतम् ? सा(शा)र्वरं-रात्रिसत्कम् । कीदृशम् ? आक्रान्तलोकं-व्याप्तभुवनम्, तथाऽलिनीलं-भृङ्गकृष्णम्, तथाऽशेषं-सकलम् । कथम् ? आशु-शीघ्रम् । किम्भूतं सत् ? सूर्यांशुभिन्नं-रविकरविदारितम् ॥७॥

यतस्तव संस्तवेन क्षणात् क्षयं पापमुपैति, अत आह-

**मत्वेति नाथ ! तव संस्तवनं मयेद-मारभ्यते तनुधियाऽपि तव प्रभावात् ।**
**चेतो हरिष्यति सतां नलिनीदलेषु मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥८॥**

इदं - वक्ष्यमाणं संस्तवनं - संस्तवो मया । कीदृशेनापि ? तनुधियाऽपि-स्तोकबुद्ध्याऽपि आरभ्यते-क्रियते । हे नाथ !- स्वामिन् !। कस्य सम्बन्धि ? तव-भवतः । किं कृत्वा ? मत्वा-ज्ञात्वा । किं तद् ? इति - पूर्वश्लोकभणितम् । कुत आरभ्यते ? तव प्रभावाद्-भवतः सामर्थ्यात्, नाऽऽत्मीया स्तवनकरणशक्तिरस्ति । तच्च चेतो-मनो हरिष्यति-रञ्जयिष्यति । केषाम् ? सतां-सत्पुरुषाणां सुजनानाम् । अत्र-अत्रार्थे**ऽर्थान्तरन्यास**माह-ननु-अहो !, उदकबिन्दुः-तोयबिन्दुः मुक्ताफलद्युतिं-मौक्तिकशोभां उपैति-गच्छति । केषु ? नलिनीदलेषु-पद्मिनी पत्रेषु स्थितः । यथोदकबिन्दुर्विशिष्टाधारवशेन शोभां प्राप्तवान्, तथा मदीयमपि स्तवनं सुजनाधारत्वेन प्रसंशां(शंसां) प्राप्स्यति ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न केवलं भवतः स्तवने (स्तवेन ?) सर्वदोषापगमः, कथापि दुरितं हन्ति, एतदाह-

**आस्तां तव स्तवनमस्तसमस्तदोषं त्वत्संकथाऽपि जगतां दुरितानि हन्ति ।**
**दूरे सहस्रकिरणः कुरुते प्रभैव पद्माकरेषु जलजानि विकासभाञ्जि ॥९॥**

आस्तां-तिष्ठतु तव स्तवनं-स्तोत्रम् । कीदृशम् ? अस्तसमस्तदोषं-निराकृति(त)सकलरागादिदोषगणं, त्वत्संकथाऽपि-भवद्वार्त्ताऽपि जगतां-भुवनवर्त्तिप्राणिनां दुरितानि-दुःकृतानि निहन्ति-विनाशयति । अत्रार्थे-**ऽर्थान्तरन्यास**माह -दूरे-विप्रकृष्टे तिष्ठतु । कोऽसौ ? सहस्रकिरणो-भानुः । कुरुते-विदधाति । कोऽसौ ? प्रभैव-दीप्तिरेव । कानि कुरुते ? जलजानि-पद्मानि । कीदृशानि ? विकाशभाञ्जि-विकसितानि । केषु ? पद्माकरेषु-पद्मखण्डेषु । रविस्थानीयं स्तवनं, प्रभातुल्या संकथेति ॥९॥

यश्च भक्त्या भवन्तं स्तौति स तवैव समो भवतीति दर्शयति-

**नात्यद्भुतं भुवनभूषण ! भूतनाथ !**
**भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः ।**
**तुल्या भवन्ति भवतो ननु तेन किं वा**
**भूत्याऽऽश्रितं य इह नात्मसमं करोति ? ॥१०॥**

तदेतन्नात्यद्भुतं-नाश्चर्यकारि यत् तुल्याः समानाः भवतः-तव भवन्ति-जायन्ते । हे भूतनाथ !-प्राणिप्रभो !। क(की)दृशः ? भुवनभूषण !-जगज्जन्तु-मण्डन ! किं कुर्वन्तः ? अभिष्टुवन्तः-नुवन्तः । कम् ? भवन्तं-त्वाम् । कस्याम् ? भुवि-पृथव्याम् । कैः ? गुणैर्ज्ञानादिभिः । कीदृशैः ? भूतैः-सद्भूतैः सत्यैः । **अर्थान्तरन्यास**माह-ननु-अहो !, किंवा यथा (अथवा) किं प्रयोजनम् ?। केन ? तेन-प्रभुणा, य इह जगति [न]करोति-न विदधाति । कम् ? आश्रितम् । कीदृशम् ? आत्मसमं-आत्मसमानम् । कया ? भूत्या-श्रिया ॥१०॥

अतिशयरूपवत्त्वं भगवतो दर्शयितुमाह-

**दृष्ट्वा भवन्तमनिमेषविलोकनीयं नान्यत्र तोषमुपजा( या )ति जनस्य चक्षुः ।**
**पीत्वा पयः शशिकरद्युति दुग्धसिन्धोः क्षारं जलं जलनिधेरसितुं क इच्छेत् ? ॥११॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जनस्य-लोकस्य [चक्षुः]-नेत्रं तोषं-तुष्टिं न उपजा(या)ति- लभते । क्व ? अन्यत्र-त्वत्तोऽपरस्मिन् दृष्टे सति । किं कृत्वा ? दृष्ट्वा-अवलोक्य । कम् ? भवन्तं-त्वाम् । कीदृशम् ? अनिषिध(अनिमेष)विलोकनीयं - निमेषरहितं यथा भवति तथा विलोक्यते यः स तथोक्तः, तम् । अतिरूपत्वाद् भवन्तं पश्यन्तो नेत्रनिमीलनमपि विघ्नकल्पत्वान्न कुर्वन्तीत्यर्थः । अत्रार्थे**ऽर्थान्तर-न्यास**माह- कः-प्राणी इच्छेद्-अभिलषेत् । किं कर्तुम् ? रसितुं-आस्वादयितुम् । किं तत् ? जलं-पानीयम् । किम्भूतम् ? क्षारं-दुष्टास्वादम् । कस्य ? जलनिधेः-समुद्रस्य । किं कृत्वा ? पीत्वा-रसित्वा । किं तत् ? पयो-जलम् । कीदृशम् ? शशर(शशिकर)द्युति-चन्द्ररस्मि(श्मि)निर्मलम् । कस्य ? दुग्धसिन्धोः-क्षीरसागरस्य । नैव कश्चिदिच्छेदित्यर्थः ॥११॥

अहमेवं मन्ये-भवद्देहनिःपत्तये येऽणवो व्याधृ(पृ)तास्ते तावन्त एव । यत्(त) आह-

**यैः शान्तराग ! रुचिभिः परमाणुभिस्त्वं निर्मापितस्त्रिभुवनैकललामभूत ! ।**
**तावन्त एव खलु तेऽप्यणवः पृथिव्यां यत्ते समानमपरं नहि रूपमस्ति ॥१२॥**

खलु-निश्चयेन तेऽपि-ते पुनः अणवः-परमाणवः तावन्तः-तत्परिमाणा एव, अन्ये न सन्तीत्यर्थः । यैः परमाणुभिस्त्वं-भवान् निर्मापितो-निःपादितः । कीदृशैः ? रुचिभिः-दीप्तिमद्भिः । हे शान्तराग ! - वीतराग ! । कीदृशो निर्मापितः ? त्रिभुवनैकललामभूतो-जगत्त्रयाद्वितीयतिलक इव भूतशब्द इवार्थे । तावन्त एव । कस्याम् ? पृथिव्यां - भुवि । कथं ज्ञायते ? यद्-यस्माद् नहि-नैव अपरं-अन्यद् रूपं-आकृतिः अस्ति-विद्यते । कीदृशम् ? समानं-तुल्यम् । कस्य ? ते - तव ॥ अनेनापि रूपातिशयत्वं भगवतो दर्शितम् ॥१२॥

साम्प्रतं भगवतो मुखं वर्णयति-

**वक्त्रं क्व ते सुरनरोरगनेत्रहारि**
**निःशेषनिर्जितजगत्त्रितयोपमानम् ।**
**बिम्बं कलङ्कमलिनं क्व निशाकरस्य**
**यद् वासरे भवति पाण्डुपलास(श)कल्पम् ॥१३॥**

निःशेषं-समस्तं यथा भवति तथा, निःशेषाणि वा निर्जितानि-तिरस्कृतानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जगत्त्रितये वर्तमानानि उपमानानि-उपमा येन तत्तथोक्तम् । भगवन्मुखतुल्यं किञ्चिदपि नास्तीत्यर्थः । चन्द्रबिम्बमुपमानं भविष्यतीति चेत्, आह-बिम्बं-मण्डलं क्व ?- नैतत् । कीदृशम् ? कलङ्कमलिनं-मृगलाञ्छनलाञ्छितं कुशोभमित्यर्थः । कस्य ? निशाकरस्य-चन्द्रस्य, यद्-बिम्बं भवति-जायते । क्व ? वासरे-दिवसे । कीदृशम् ? पाण्डुपलाशकल्पं-पक्वपत्रतुल्यम् । कलङ्कयुक्तत्व-निस्तेजस्त्वाभ्यां न समानं भगवन्मुखं च विपरीतम् ॥१३॥

निरुपमगुणाश्रयत्वाद् भगवान् स्तुत्य [इ]ति दर्शयि(य)ति-

**सम्पूर्णमण्डलशशाङ्ककलाकलाप !**
**शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति ।**
**ये संस्त्रि( श्रि )तास्त्रिजगदीश्वर ! नाथमेकं**
**कस्तां( स्तान् ) निवारयति सञ्चरतो यथेष्टम् ? ॥१४॥**

हे सम्पूर्णमण्डलशशाङ्ककला[कला]प ! - परिपूर्णबिम्बो यः शशाङ्कः-चन्द्रस्तस्य कला तत्कलापो-द्विसप्ततिकलासमूहो यस्य स तथोक्तः, तस्यामन्त्रणं हे सम्पूर्णे त्यादि । एते गुणा-ज्ञानादयः शुभ्रा-धवलास्तव-भवतस्त्रिभुवनं-जगत्त्रयं लङ्घयन्ति-अतिक्रामन्ति-जयन्तीत्यर्थः । ये संश्रिता-आश्रितास्त्रिजगदीश्वर ! -हे भुवनत्रय प्रभो ! । कं संश्रिताः ? नाथं-स्वामिनं च । किम्भूतम् ? एकं -अद्वितीयम् । यद्वा त्रिजगदीश्वरा भवनपति-व्यन्तर-ज्यो[ति]ष्क-वैमानिकेन्द्रास्तेषां नाथं-स्वामिनं त्वां संश्रित्या (ताः) । अत्रार्थे**ऽर्थान्तरन्यास**माह-एकरु(क?)क्षष्ट-(स्थि ?) तान् गुणान् सञ्चरतो-भ्रमतः । कथम् ? यथेष्टं - स्वेच्छया को निवारयति-निषेधयति ? नैव कश्चित् ॥१४॥

**चित्रं किमत्र यदि ते त्रिदशाङ्गनाभि-र्नीतं मनागपि मनो न विकारमार्गम् ।**
**कल्पान्तकालमरुता चलिताचलेन किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥१५॥**

किमत्र चित्रं - किमाश्चर्यमेतस्मिन् यदि-यद् न नीतं-न गमितम् । किं तत् ? मनः-चित्तम् । कस्य ? ते - तव । कं न नीतम् ? विकारमार्गं-विकृतिपथम् । कथम् ? मनागपि-स्तोकमपि । काभिः ? त्रिदशाङ्गनाभिः-देवकान्ताभिः । अत्रार्थे**ऽर्थान्तरन्यास**माह-किं का(क)दाचित्-कस्मिंश्चित् काले

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्दराद्रिशिखरं-मेरुशृङ्गं चलितम् ? नैव कम्पितम् । केन ? कल्पान्तकालमरुता-युगक्षयसमयवायुना । कीदृशेन ? चलिताचलेन-कम्पितापरगिरिणा । यादृशं मेरुशृङ्गं तादृशं भगवन्मनः ॥१५॥

प्रकास(श)कत्वादपूर्वदीपत्वं भगवतो वर्णयितुमाह-

**निर्द्धूमवर्त्तिरपवर्जिततैलपूरः**
**कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि ।**
**गम्यो न जातु मरुतां चलिताच[ला]नां**
**दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥१६॥**

हे नाथ ! स्वामिन् ! दीपः-प्रदीपः अपरो-ऽन्योऽपूर्वो असि-भवसि त्वम् । कीदृशः ? जगत्प्रकाशः-त्रिभुवनोद्योतकः । दीपो हि गृहैकदेशे प्रकाशको भवति । यतो न गम्यो-न पराभवनीयः । केषाम् ? मरुतां-वायूनाम् । कीदृशानाम् ? चलिताचलानां-कम्पितगिरीणाम् । कथम् ? जातु-कदाचिद् यथा । प्रकटीकरोषि-प्रकाशा(श)यसि । किं तत् ? इदं-प्रत्यक्षं जगत्त्रयं-भुवनत्रितयम् । किम्भूतम् ? कृत्स्नं-सर्वम् । कीदृ[श]स्त्वं दीपः ? निर्द्धूमवर्त्तिः-निर्गतौ धूम-वर्त्ती यस्य स तथोक्तः ॥१६॥

सूर्यादपि अधिकत्वं दर्शयितुमाह-

**नाऽस्तं कदाचिदुपयासि न राहुगम्यः स्पष्टीकरोषि सहसा युगपज्जगन्ति ।**
**नाम्भोधरोदरनिरुद्धमहाप्रभावः सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥१७॥**

हे मुनीन्द्र ! - गणधरादिसाधुनाथ ! असि-भवसि त्वम् । कीदृशः ? सूर्यातिशायिमहिमा-सूर्यातिशायी-सूरतिरस्कारी महिमा-महत्त्वं यस्य स तथोक्तः । यतो नास्तं-[न] तिरोध(धा)नत्वं कदाचिदुपयासि-उपगच्छसि । सूरो हि सन्ध्यासमये छन्नो भवति, त्वं पुनः सदा प्रकास(श)रूपः । तथा त्वं न राहुगम्यः-तमपराभवनीयो न भवति(सि) । रविश्च ग्रहणकाले तमसा पराभूयते । तथा त्वं सहसा-सन्ततं युगपद्-एककालं जगन्ति-त्रीणि भवनानि अधोमध्यमोद्र्ध्वरूपाणि स्पष्टीकरोषि-प्रकाशयसि । रविः पुनर्भुवनैकदेशं क्रमेण सततं प्रकाशयति । तथा त्वं नाम्भोधरोदरनिरुद्धमहाप्रभावः-अम्भोधरा-मेघास्तेषामुदरं-कुक्षिः, तेन तस्मिन् वा निरुद्धो-ऽपनीतो महान्-बृहत् प्रभावः-

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

प्रतापो यस्य स तथोक्तः । आदित्यस्त्वेतद्विपरीतो भवति अतः सूर्यातिशायिमहिमा त्वम् ॥१७॥

इदानीं भगवतो मुखपद्मस्याऽपूर्वशशाङ्करूपतां स्तवकारो वर्णयति-

**नित्योदयं दलितमोहमहान्धकारं गम्यं न राहुवदनस्य न वारिदानाम् ।**
**विभ्राजते तव मुखाब्जमनल्पकान्ति विद्योतयज्जगदपूर्वशशाङ्कबिम्बम्॥१८॥**

हे जिन ! तव मुखाब्जं-मुखकमलं विभ्राजते-विशेषेण विविधं वि(वा) द्योतते । कीदृशम् ? अनल्पकान्ति-गुरुदीप्ति गुरुकमनीयं च । किम्भूतं सद् ? अपूर्वशशाङ्कबिम्बं-अ[न]न्यचन्द्रमण्डलं, यतो नित्योदयं-सर्वदोदितम् । चन्द्र-मण्डलं तु रात्र्युदयम् । तथा दलितमोहमहान्धकारं - दलितो-नासि(शि)तो मोह एव-अज्ञानमेव महान्धकारो-गुरुतमो येन तत् तथोक्तम् । चन्द्रबिम्बं तु मोहतमो विनाशयितुं न शक्तं भवति । तथा न गम्यं-न पराभवनीयम् । कस्य ? राहुवदनस्य-तमोमुखस्य । कर्तरि षष्टीयं, 'कृत्यानां कर्त्तरि चे'ति । तथा न वारिदानां-मेघानां गम्यं-पराभवनीयम् । तत्पराभवोत्तीर्णत्वात् । चन्द्रबिम्बं तु राहुमुखस्य मेघानां च गम्यं भवति, भक्षणादावरणाद्वा ॥१८॥

रात्रौ चन्द्रस्य दिने च रवेर्भगवतो मुखचन्द्रे सति निरर्थकत्वं स्तवकारो वर्णयति-

**किं शर्वरीषु शशिनाऽह्नि विवस्वता वा युष्मन्मुखेन्दुदलितेषु तमस्सु नाथ ! ।**
**निष्पन्नशालिवनशालिनि जीवलोके कार्यं कियज्जलधरैर्जलभारनम्रैः ?**
**॥१९॥**

हे नाथ ! - स्वामिन् ऋषभ ! किं शशिना - किं प्रयोजनं चन्द्रेण ? कासु ? शर्वरीषु-रात्रिषु । विवस्वता वा - आदित्येन वा किं प्रयोजनं ? क्व ? [अह्नि]- दिने । न किञ्चित् । केषु सत्सु ? तमस्सु-ध्वान्तेषु । किम्भूतेषु ? युष्मन्मुखेन्दुदलितेषु-त्वद्वक्त्रचन्द्रविनासि(शि)तेषु । तमोविनाशनं हि चन्द्र-सूर्यमसोः (सूर्य-चन्द्रमसोः) कार्यं, तच्च त्वन्मुखचन्द्रेणैव कृतं, अतो निःप्रयोजनौ । तावदत्रार्थेऽर्थान्तरन्यासमाह-कियत् कार्यं-किं प्रयोजनं, न किमपि । कैः ? जलधरैः-मेघैः । कीदृशैः ? जलभारनम्रैः - उदकसंघातनतैः । क्व ? जीवलोके - जन्तुनिवासे जगति । कीदृशे ? निष्पन्नशालिवनशालिनि-निष्पन्नानि यानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शालिवनानि-कलमव्रीहिसत्कानि क्षेत्राणि तैः । सा(शा)लते-शोभते यः स तथोक्तः, तस्मिन् । शालिवा(व)नानामुपलक्षणत्वाद् यदा किल निष्पन्नसर्वशस्य सम्पन्नो भवति प्रकारान्तरेण जीवलोकः, किं प्रयोजनं जलनम्रमेघैः, सत्कार्यस्य सिद्धत्वात् । एवं किं प्रयोजनं शशि-सूर्याभ्यामिति ॥१९॥

हरिहरब्रह्मादिदेवेभ्यो भगवतोऽतिशायि ज्ञानं कविर्वर्णयितुमाह-

**ज्ञानं यथा त्वयि विभाति कृतावकाशं नैवं तथा हरिहरादिषु नायकेषु ।**
**तेजो महामणिषु याति यथा महत्त्वं नैवं तु काचस( श )कले किरणाकुलेऽपि**
**॥२०॥**

हे भगवन् ! यथा-येन प्रकारेण त्वयि-भवति यथावस्थितार्थपरिच्छेदको बोधो विभाति-विशेषेण शोभते, गतरागत्वाद् भगवतः, नैवं-नैव तथा-तेन प्रकारेण विभाति ज्ञानम् । केषु ? हरिहरादिषु नायकेषु-विष्णु-शङ्कर-ब्रह्मादिषु प्रभुषु, सरागत्वान्मोहोपेतत्वाच्च । ज्ञानं च कीदृशं ? कृतावकाशं-विहितप्रकाशं धर्माधर्मादेः । न च सरागस्य मूढस्य चाज्ञानं विहितप्रकाशं भवति । अत्रार्थेऽ-**र्थान्तरन्यास**माह-तेजो-धाम यथा-येन प्रकारेण महत्त्वंमहिमानं बृहत्त्वं याति-प्राप्नोति । कासु?(केषु?)महामणिषु-महारत्नेषु इन्द्रनीलादिषु, तथा काचस(श)-कलेषु-काचखण्डेषु पुनर्नैवं-नैवं(व) तेजो-महत्त्वं याति । कीदृशेऽपि ? किरणा-कुलेऽपि-रश्मिव्याप्तेऽपि । काचस(श)कलतुल्या हरिहरादयः, कथं तथा ज्ञानं भवेदिति ॥२०॥

वक्रोक्त्या भगवतो मनोहारित्वं हरिहरादिभ्यः स्तवकारो वर्णयति-

**मन्ये वरं हरिहरादय एव दृष्टा**
**दृष्टेषु येषु हृदयं त्वयि तोषमेति ।**
**किं वीक्ष(क्षि)तेन भवता भुवि येन नान्यः**
**कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥२१॥**

अहमेवं मन्ये-जाने हे नाथ ! - स्वामिन् ! वरं-प्रधानं हरिहरादयो-विष्णुशङ्करादय एव दृष्टा-अवलोकिताः, किं भवता दृष्टेन ?। यतो येषु हर्यादिषु दृष्टेषु हृदयं-मनः तोषं-प्रीतिं उपैति-गच्छति । क्व ? त्वयि-भवति, त्वय्येव प्रीतिं करोति, नान्यत्रेत्यर्थः । किं प्रयोजनं वीक्ष(क्षि)तेन-दृष्टेन ?। केन ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवता-त्वया । कस्याम् ? भुवि-पृथिव्याम् । येन भवद्वीक्षणेन-करणेन हेतुना वा नान्यो-ना[परो] मतो(नो)-मानसं हरति-रञ्जयति । क्व ? भवान्तरेऽपि। आस्तामिह जनम्नि(न्मनि), जन्मान्तरेऽपि । अनेन भगवति दृष्टे सति अन्यो न चित्ते विशति तथाविधगुणाभावादिति दर्शितम् ॥२१॥

साम्प्रतं सर्वजननीपुत्रातिशायित्वं भगवतो वर्णयति-

**स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्**
**नान्या सुतं त्वदुपमं जननी प्रसूता ।**
**सर्वा दिशो दधति भानि सहस्त्ररस्मिं( श्मिं )**
**प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥२२॥**

जनयन्ति-प्रसवन्ति । कानि ? स्त्रीणां शतानि-बह्व्यो योषितः । कान् ? पुत्रान्-सूनून् । कियतः ? शतशः-अनेकशतानि । केवलं त्वदुपमं-भवत्समानं सुतं-पुत्रं न प्रसूता-न जनितवती । काऽसौ ? जननी-माता । किम्भूता ? अन्या-मरुदेव्यपरा । अत्रार्थे**ऽर्थान्तरन्यास**माह-सर्वा:-सकला दिशाः-आशा दधति-बिभ्रति । कानि ? भानि-नक्षत्राणि । सहस्त्ररस्मिं(श्मिं)-आदित्यं पुनः प्राच्येव-पूर्वैव दिग्-आसा(शा) जनयति-प्रसवति, नाऽन्या दिक् । कीदृशम् ? स्फुरदंशुजालं-प्रसरत्किरणनिकरम् । यादृशो रविस्तादृशो भगवान्, यादृशी प्राची तादृशी मरुदेवी भगवतीति ॥२२॥

इदानीं भगवतः परमपुरुषत्वं मृत्युज(ञ्ज)यत्वं मुक्तिमार्गत्वं च स्तवकारो वर्णयति-

**त्वामामनन्ति मुनयः परमं पुमांस-**
**मादित्यवर्णममलं तमसः पु( प )रस्तात् ।**
**त्वामेव सम्यगुपलभ्य जयं[ति] मृत्युं**
**नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥२३॥**

मुनयो-जगतस्त्रिकालावस्थावि(वे)दिनस्त्वां-भवन्तं आमनन्ति-प्रतिपादयन्ति-अभ्यस्यन्ति वा । किम्भूतम् ? पुमांसं-पुरुषम् । कीदृशम् ? परमं-प्रकृष्टम् । तथाऽऽदित्यवर्ण(र्णं)रवो[1] --- । [उ]पलभ्य-ज्ञात्वा प्राप्य वा

१. अत्र टीका त्रुटिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुनयोर्ज(ज)यन्ति-अभिभवन्ति । कम् ? मृत्युं-मरणम्, मरणभाजो न भवन्ति, मोक्षगमनात् । कथमुपलभ्य ? सम्यग्-ज्ञानादिपूर्वकं च । तथा हे मुनीन्द्र ! -गणधरादिसाधुनाथ ! नान्यो-नापरोऽस्ति । कोऽसौ ? पन्था-मार्गः । कस्य ? शिवपदस्य-मुक्तिस्थानस्य । कीदृशः ? शिवः-क्षेमो-निरपायमि(इ)त्यर्थः । त्वां विहाय-त्वत्सेवया-त्वद्वचनानुष्ठानेन वा मोक्षावाप्तेः, इत्यनेन परदर्शनानि निराकृतानि द्रष्टव्यानि, तेषां मोहान्धत्वेनान्यथा वचोधात् (?) ॥२३॥

अधुना एकस्यापि भगवतो अनेकत्वं गुणद्वारकं स्तवकार आह-

**त्वामव्ययं विभुमचिन्त्यमसङ्ख्यमाद्यं**
**ब्रह्माणमीश्वरमनन्तमनङ्गकेतुम् ।**
**योगीश्वरं विदितयोगमनेकमेकं**
**ज्ञानः(न)श्व(स्व)रूपममलं प्रवदन्ति सन्तः ॥२४॥**

हे न्ना(ना)थ ! सन्तो-विद्वांसस्त्वां-भवन्तं प्रवदन्ति-प्रतिपादयन्ति । किम्भूतम् ? ब्रह्माणं-पद्मयोनिं, ज्ञानसम्पन्नत्वात् । तथेश्वरं-महेश्वरं, अणिमाद्यै-श्वर्ययुक्तत्वात् । तथाऽनन्तं-वासुदेवं, अलब्धपरत्वात् । कीदृशम् ? अनन्त(ङ्ग)-केतुं-कामनाशकम् । तथाऽव्ययं-अक्षयम् । तथा विभुं-व्यापकं, केवलालोकेन व्याप्तचतुर्दशरज्ज(ज्जु)प्रमाणलोकालोकत्वात् । तथाऽचिन्त्यं, भगवत्स्वरूपस्य चिन्तय(यि)तुमशक्यत्वात् । तथाऽऽद्यं, धर्मस्याऽऽदौ तत एव प्रवृत्तेः । तथाऽसङ्ख्यं, न विद्यते ज्ञानादेः सङ्ख्याऽस्येत्यसङ्ख्यम्, एतावत्(द्) ज्ञानं सुखं दर्शनं वा भग[व]तः परिच्छेत्तुमशक्यत्वात् । तथा योगीश्वरं-ध्यानमार्ग-प्रविष्टनरनायकम् । यतो विदितयोगं-ज्ञान(त)धर्मध्यानादिव्यापारम् । तथाऽनेकं, उक्तक्रमेणाऽनेकरूपत्वात् । तथैकं, स्वरूपेणैकरूपत्वात् । विरोधश्चात्रैवमुद्भावनीयो यद्यनेकं कथ[मेक]मनेकत्वात् । [यद्येकं कथमनेकमेकत्वात् ।] नैक[त्वाऽनेक]त्वे हि परस्परविरुद्धे । विरोधश्च पर(रि)हृत एव । तथा ज्ञानस्वरूपं-ज्ञानमयं अस्त्येव, कर्मक्षयेण शरीराभावात् । तथाऽमलं-निर्मलं, रागादिमलरहितत्वात् ॥२४॥

इदानीं पुरुषचतुष्टयरूपत्वं तद्गुणयोगेन भगवतो दर्शयितुमाह-

**बुद्धस्त्वमेव विबुद्धा(धा)र्चित ! बुद्धिबोधात्**
**त्वं शङ्करोऽषि(सि) भुवनत्रयशङ्करत्वात् ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**धाताऽसि धीर ! शिवमार्गविधेर्विधानाद्**
**व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥२५॥**

हे भगवन् !-ऐश्वर्यादिगुणयुक्त ! त्वमेवाऽसि । कोऽसौ ? बुद्धो देवताविशेषः, बुद्ध्यते स्म तत्त्वमित्यन्वर्थत्वात् । कुतः ? बुद्धिबोधाद्-बुद्ध्या-केवलज्ञानेन सकलतत्त्वपरिच्छेदात् । कीदृश !? विबुधार्चित ! - स(श)क्रादि देवसंघातपूजित ! । तथा त्वं-भवान् शङ्करोऽसि-शिवो भवसि । कस्माद् ? भुवनत्रयशङ्करत्वाद्-जगत्त्रयसुखकारित्वात् । तथा हे धीर !-ज्ञानराजिन् ! धाता-श्रेष्ठोऽसि-भवसि त्वम् । कुतः ? शिवमार्गविधेर्विधानाद्-मोक्षपथसृष्टेः करणात् । तथा त्वमेवाऽसि-भवसि । कीदृशः ? पुरुषोत्तमः-पुरुषाणां मध्ये उत्तमः-उत्कृष्टः पुरुषोत्तमः सर्वनरप्रधान इत्यर्थः, अन्यत्र विष्णुः । कथम् ? व्यक्तं-स्पष्टम् । पूर्वोक्तगुणैर्देवचतुष्टयमयत्वं दर्शितम् ॥२५॥

इदानीमनेकगुणैः कृत्वा भव(भगव)तोऽतिशायित्वख्यापनाय पुनः पुनर्नमस्कारमाह कविः-

**तुभ्यं नमस्त्रिभुवनार्त्तिहराय नाथ ! तुभ्यं नमः क्षितितलामलभूषणाय ।**
**तुभ्यं नमस्त्रिजगतः परमेश्वराय तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥२६॥**

नमो-नमस्कारोऽस्तु । कस्मै ? तुभ्यं-भवते । किम्भूताय ? त्रिभुवनार्त्तिहराय-त्रिजगज्जन्तुपीडानाशकाय हे नाथ ! - स्वामिन् !। तथा तुभ्यं नमो-भवते नमस्कारो भवतु । कीदृशाय ? क्षितितलामलभूषणाय-भूतलनिर्मलाभरणाय । तथा तुभ्यं नमः पूर्ववत् । कीदृशाय ? परमेश्वराय-प्रधानप्रभाव(भवे) । कस्य ? त्रिजगतः-त्रिभुवनस्थजन्तूनां रक्षणादिसमर्थत्वात् । तथा तुभ्यं नमः पूर्ववत् । हे जिन ! - रागादिजेतः !। कीदृशाय ? भवोदधिशोषणाय-संसारसमुद्र[नि]र्नाशनाय, आत्मनोऽन्येषां च ॥२६॥

साम्प्रतं निःशेषगुणाश्रितत्वं दोषनिराकृतत्वं च भगवतो दर्शयितुमाह कविः-

**को विस्मयोऽत्र यदि नाम गुणैरशेषै-**
**स्त्वं शंस्त्रि(संश्रि)तो निरवकास(श)तया मुनीश !।**
**दोषैरुपात्तविविधाश्रयजातगर्वैः**
**स्वप्नान्तरेऽपि न कदाचिद्वी(दपी)क्षितोऽसि ॥२७॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हे मुनीश ! - गणधरादिसाधुनाथ ! को विस्मयोऽत्र ? - किमत्राश्चर्यम् ?। यदि त्वं-भगवान् संश्रितः-संस(से)वितो नाम-अहो ! व्यक्तं वा । कैः ? गुणैरतिशायिज्ञानादिभिः । किम्भूतैः ? अशेषैः-सर्वैर्न कियद्भिः । कया ? निरवकाशतया-निर्विषयतया, तथाविधोऽन्यो विषयो नास्ति यः समग्रगुणानामाधारः । तथा हे मुनीश ! न कदाचिद्-न कस्मिंश्चित् काले वीक्ष(क्षि)तोऽसि-अवलोकितोऽसि । क्व ? स्वप्नान्तरेऽपि-स्वप्नमध्येऽपि, आस्तां जागरमाणैः । कैः? दोषैः । कीदृशैः? उपात्तविविधाश्रयजातगर्वैः-प्राप्तनानाप्रकारा-धारोत्पन्नदर्पैः ॥

इदानीं षड्भिः श्लोकैर्भगवतो विभूतिं वर्णयितुमाह स्तवकारः-

**उच्चैरशोकतरुसंश्रितमुन्मयूख-माभाति रूपममलं भवतो नितान्तम् ।**
**स्पष्टोल्लसत्किरणमस्ततमोवितानं बिम्बं रवेरिव पयोधरपार्श्ववर्त्ति ॥२८॥**

**सिंहासने मणिमयूखशिखाविचित्रे विभ्राजते तव वपुः कनकावदातम् ।**
**बिम्बं वियद्विलसदंशुलतावितानं तुङ्गोदयाद्रिशिरसीव सहस्त्ररस्मेः( श्मेः ) ॥२९॥**

**कुन्दावदातचलचामरचारुशोभं विभ्राजते तव वपुः कलधौतकान्तम् ।**
**उद्यच्छशाङ्कशुचिनिर्झरवारिधार-मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥३०॥**

**छत्रत्रयं तव विभाति शशाङ्ककान्त-मुच्चैःस्थितं स्थगितभानुकरप्रतापम् ।**
**मुक्ताफलप्रकरजालविवृद्धशोभं प्रख्यापयः( य )त् त्रिजगतः परमेश्वरत्वम् ॥३१॥**

**उन्निद्रहेमनवपङ्कजपुञ्जकान्ति-पर्युल्लसन्नखमयूखशिखाभिरामौ ।**
**पादौ पदानि तव यत्र जिनेन्द्र ! धत्तः पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥३२॥**

**इत्थं यथा तव विभूतिरभूज्जिनेन्द्र ! धर्मोपदेशनविधौ न तथा परस्य ।**
**यादृग्( क् )प्रभा दिनकृतः प्रहतान्धकारा तादृक्कुतो ग्रहगणस्य विकासिनोऽपि ॥३३॥**

हे जिनेन्द्र ! - सामान्यकेवलिनाथ ! यथा-येन प्रकारेण तव-भवतो विभूतिः-ऐश्वर्यमभूद्-बभूव । कथम् ? इत्थं-अनेन पूर्वप्रकारेण । कस्मिन् ? धर्मोपदेशनविधौ-ज्ञानोत्पत्तिसमनन्तरचतुर्विधधर्मकथनकाले । तथा - तेन प्रकारेण नापरस्य-नान्यस्य बुद्धादेः । अत्रार्थेऽर्थान्तरन्यासमाह-यादृग्-यादृशी प्रभा-दीप्तिर्दिनकृतो-रवेर्भवति । कीदृशी ? प्रहतान्धकारा-नासि(शि)ततमाः तादृक्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तादृशी । कुतो भवति ? ग्रहगणस्य-शुक्रादिवृन्दस्य । कीदृशः ? विकासिनोऽपि-प्रकास(श)वतोऽपि । सूर्यतुल्यो भगवान्, शेषग्रहतुल्या बुद्धादयो देवाः ॥३३॥ तामेव दर्शयति-

भवतः-ते रूपं-मूर्तिवि(र्वि)भाति-शोभते । कथम् ? नितान्तं-अतिशयेन । कीदृशम् ? अमलं-निर्दोषम् । तथोन्मयूखं-उद्गतकिरणजालं, तथोच्चैरशोकतरुसंश्रितं-उच्चतरु(र)कंकेल्लिवृक्षासन्नवर्तिनम् । कीदृशं ? स्पष्टोल्लसत्किरणं प्रसरद्-व्यक्तरश्मिजालं, अत एवाऽस्ततमोवितानं-निराकृतान्धकारसंघातं । तथा पयोधर-पार्श्ववर्ति-मेघनिकटावस्थितम् ॥२८॥

तथा तव-भवतो वपुः-शरीरं विभ्राजते-विशेषेण शोभते । कीदृशं ? कनकावदातं-स्वर्णवर्णम् । क्व स्थितं ? सिंहासने-हरियुक्तभद्रपीठे । कीदृशे ? मणिमयूखशिखाविचित्रे-रत्नानाना(रत्नानां) किरणज्वालाविविधचित्रे । किमिव शोभते ? बिम्बमिव-मण्डलमिव । कस्य ? सहस्ररस्मे(श्मे):-आदित्यस्य । क्व स्थितम् ? तुङ्गोदयाद्रिशिरसि-उच्चोदयाचलमस्तके । कीदृशम् ? वियद्विलसदंशु-लतावितानं-आकास(श)प्रसरत्-किरणवि(व)ल्लिसंघातम् ॥२९॥

तव वपुः-भवतः शरीरं विभ्राजते-विविधं राजते । कीदृशं ? कुन्दावदात्तं(त)चलचामरचारुशोभं-कुन्दकुसुमनिर्मलं(ल)चञ्चलव्यजनसो(शो)भनश्रीकम् । तथा कलधौतकान्तं-सुवर्णकमनीयम् । किमिवाभाति ? तद(ट)मिव-वपु इव (?) । कीदृशं ? उच्चैः-उच्चम् । कस्य ? सुरगिरेः-मेरोः । तथा शातकौम्भं - सुवर्णमयम् । तथा उद्यच्छशाङ्कशुचिनिर्झरवारिधारं-उद्यच्छशाङ्कवद्-उद्गच्छच्चन्द्रस्येव शुचयो-निर्मला वारिधारा-जलराजयो यत्र तत् तथोक्तम् । चामरस्य साम्यं दर्शितम् ॥३०॥

तथा छत्रत्रयं-आतपत्रत्रयी तव-भवतो विभाति-विविधं शोभते । कीदृशं ? शशाङ्ककान्तं-चन्द्रनिर्मलम् । तथोच्चैः स्थितं-उपरिव्यवस्थितम् । तथा स्थगितभानुकरप्रतापं-आच्छादितरविकिरणप्रभावं । तथा मुक्ताफलप्रकरजालविवृद्ध-शोभं-मुक्ताफलप्रकरजालेन मौक्तिकविसरस्तबकेन विशेषेण वृद्धा-वृद्धिं गता शोभा-श्रीर्यस्य तत् तथोक्तम् । किं कुर्वन्(त्) ? प्रख्यापयत्-प्रकटयत्, त्रिजगतः-त्रिभुवनजन्तूनां परमेश्वरत्वं-प्रकृष्टप्रभुत्वं, छत्रत्रयं हि त्रिभुवनप्रभुत्वलक्षणम् ॥३१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हे जिनेन्द्र !-तीर्थकरदेव ! तत्र-प्रदेशे विबुधा-देवाः पद्मानि-काञ्चनकमलानि परिकल्पयन्ति-रचयन्ति, यत्र-प्रदेशे तव पादौ-चरणौ पदानि-न्यासान् धत्तः-कुरुतः । कीदृशौ ? उन्निद्रहेमनवपङ्कजपुञ्जकान्तिपर्युल्लसन्नख-मयूरवशिखाभिरामौ-उन्निद्रहेमनवपङ्कजपुञ्जस्येव विकसितसौवर्ण(र्णा?) कृतिन् (?) पद्मस्येव कान्तिर्यासां तास्तथोक्ताः, ताश्च ताः पर्युल्लसन्नखमयूखशिखाश्च-प्रसरन्नखकिरणज्वालाश्च ताः, ताभिरभिरामौ-अभिरमणीयौ अभू(?) तौ तथोक्तौ ॥३२॥ अर्थापेक्षयैकं कुलकम् । यद्वा भिन्नक्रिया - भिन्ना एवैते श्लोकाः ॥

जिनाश्रितानां करिभयाभावमाहात्म्यसूचनेन कविः-

**श्च्योतन्मदाविलविलोलकपोलमूल-मत्तभ्रमद्भ्रमरनादविवृद्धकोपम् ।**
**ऐरावताभमिभमुद्धतमापतन्तं दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥३४॥**

नो-न भवति-उ[त्प]द्यते । किं तद् ? भयं-त्रासः । केषां ? भवदाश्रितानां-युष्मत्सेवाप्राप्तानाम् । किं कृत्वा ? दृष्ट्वा-ऽवलोक्य । कम् ? इभं-करिणम् । किं कुर्वन्तं ? आपतन्तं-आगच्छन्तम् । कीदृशं ? उद्धतं-दर्पोद्धुरम् । तथा ऐरावताभं-इन्द्रकरिसमानम् । कथम्भूतं ? श्च्योतन्मदाविलविलोल-कपोलमूलमत्तभ्रमद्भ्रमरनादविवृद्धकोपं-श्च्योतन्मदेन-क्षरद्दानजलेन आविलं-स्या(श्या)मलं यत् कपोलमूलं-गल्लप्रथमभागः, तस्मिन् मत्तभ्रमद्भ्रमराः क्षरच्चलद्भृङ्गाः, तेषां नादः-शब्दः, तेन विवृद्धो-वृद्धिं गतः कोपः-क्रोधो यस्य स यथोक्तस्तम् ॥३४॥

भवतः पादाश्रयणस्य फलमाह स्तवकारः-

**मत्तेभकुम्भगलदुज्ज्वलशि( शो )णिताक्त-**
**मुक्ताफलप्रकरभूषितभूमिभागः ।**
**बद्धः( द्ध )क्रमः क्रमगतं हरिणाधिपोऽपि**
**नाक्रामति क्रमयुगाचलसंश्रितं ते ॥३५॥**

हरिणाधिपोऽपि-सिंहोऽपि, आस्तामन्यः कर्यादिः । नाक्रामति-नाश्लिष्यति । कं ? क्रमयुगाचलं-पादपद्मद्वयं गिरिमाश्रितं-आरूढं तत्सम्बद्धम् । कस्य ? ते-तव । कीदृशं ? क्रमगतं-फालाविषयम् । कीदृशः ? बद्धक्रमः-रचितफालः । तथा मत्तेभकुम्भगलदुज्वलशोणिताक्तमुक्ताफलप्रकरभूषितभूमिभागः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मत्तेभस्य-क्षीबकरिणः कुम्भः-शिरःस्थलं, तस्माद् गलत्-क्षरद् उज्ज्वलं-निर्मलमच्छं रक्तं-रुधिरं, तेनाक्तानि-अवलिप्तानि यानि मुक्ताफलानि-मौक्तिकानि, तेषां प्रकरः-संघातः, तेन भूषितो-ऽलङ्कृतो भूमिभागो-भूप्रदेशो येन स तथोक्तः । अनेन विशेषणेनाऽस्याऽतिशूरत्वादिगुणाः प्रतिपादिताः ॥३५॥

साम्प्रतं प्रचण्डाग्निदर्पहरत्वेन भगवना(न्ना)म्नो जलरूप[त्व]माह-

**कल्पान्तकालपवनोद्धतवह्निकल्पं**
**दावानलं ज्वलितमुज्ज्वलमुत्फु(त्स्फु)लिङ्गम् ।**
**विश्वं जिघत्सुमिव सन्मुखमापतन्तं**
**त्वं ना ( त्वन्ना )मकीर्तनजलं स( श )मयत्यशेषम् ॥३६॥**

हे जिन ! त्वन्नामकीर्तनजलं-भवदभिधानोच्चारणोदकं स(श)मयति-निवर्तयति । कं ? दावानलं-दावाग्निम् । कीदृशं ? कल्पान्तकालपवनोद्धतवह्नि कल्पं-ज(ल)यकालवातोद्भटाग्निसदृशम् । तथाऽशेषं-समस्तम् । तथा ज्वलितं-प्रदीप्तं । तथोज्ज्वलं-उद्दीप्तम् । तथोत्स्फुलिङ्गं-उद्गताग्निकणम् । किं कुर्वन्तं ? आपतन्तं-आगच्छन्तम् । कथं ? सन्मुखं-अभिमुखम् । किं कुर्वन्तमिव ? जिघत्सन्त(जिघत्सु)मिव-भक्षितुमिव । किं तत् ? विश्वं-जगत् । अनेन च विशेषणवृन्देणाऽतिप्रचण्डत्वेन केनाप्यप्रतिसंहार्यत्वं अग्नेर्दर्शयति ॥३६॥

अधुना क्रोधोद्भटादिगुणस्य सर्पस्य क्रमयुगो(गा)क्रमणेन भगवंना(वन्ना)-म्नो नागदमनीत्वमाह स्तवकारः-

**रक्तेक्षणं समदकोकिलकण्ठनीलं**
**क्रोधोद्धतं फणिनमुत्फणमापतन्तम् ।**
**ना( आ )क्रामति क्रमयुगेन निरस्तस( श )ङ्कः**
**त्वन्नामनागदमनी हृदि यस्य पुंसः ॥३७॥**

स नर आक्रामति-आप्नोति-उपमर्दयति । केन ? क्रमयुगेन-पादद्वयेन । कीदृशः सन् ? निरस्तशङ्को-ऽपगतखादनसन्देहः । कमाक्रामति ? फणिनं-नागम् । कीदृशं ? रक्तेक्षणं-अरुणनेत्रं, तथा समदकोकिलकण्ठनीलं-मत्तपिकगल-कृष्णम् । तथा क्रोधोद्धतं-कोपोद्भटं, तथोत्फणं-उद्गतफणाभोगं, तथाऽऽपतन्तं-आगच्छन्तम् । यस्य पुंसः पुरुषस्य हृदि-चित्ते वर्तते । कोऽसौ ? त्वन्नामनागदमनी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवदभिधानसर्पदमनौषधीविशेषः ॥३७॥

इदानीं भगवन्नाम्न एवोच्चारणस्य शक्रसैन्यभेदकत्वमाह कविः-

**वल्गत्तुरङ्गगजगर्जितभीमनाद-माजौ बलं बलवतामपि भूपतीनाम् ।**
**उद्यद्दिवाकरमयूखशिखापविद्धं त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥३८॥**

भूपतीनां-नृपाणां बलं-सैन्यं चतुरङ्गं भिदां-भेदमुपैति-गच्छति । कस्मात् ? त्वन्नामकीर्तनाद्-भवदभिधानोच्चारणात् । किमिव ? तम इव-अन्धकारमिव । कीदृशं सद् ? उद्यद्दिवाकर [मयूख]शिखापविद्धं-उद्गच्छद्रविकिरणपरम्पराहतं । कीदृशानां भूपतीनाम् ? बलवतां-शक्तिमतामपि । कीदृशं बलं ? वल्गत्तुरङ्ग-गजगर्जितभीमनादं-वल्गत्तुरङ्गाश्च-इतस्ततश्चलदश्वाश्च गजाश्च-करिणश्च ते तथोक्ताः, तेषां गर्जितं, तदेव भीमो-भयकारको नादः-शब्दो यत्र तत् तथोक्तम् । क्व ? आजौ-सङ्ग्रामे ॥३८॥

इदानीं भगवत्पादसेविनां सङ्ग्रामे जयमाह स्तुतिकारः-

**कुन्ताग्रभिन्नगजशोणित[ वारि ]वाह-वेगावतारतरुणातुरयोधभीमे ।**
**युद्धे जयं विजितदुर्जयजेयपक्षाः त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥३९॥**

युद्धे-रणे जयं-शत्रुपराभवं लभन्ते-प्राप्नुवन्ति । के ? त्वत्पादपङ्कज-वनाश्रयिणो-भवच्चरणपद्मखण्डसेविनो नराः, भवच्चरणपद्मसम्यक्सेविनो वा । **समाश्रयिण** इति पाठः । कीदृशाः सन्तः ? विजितदुर्जयजेयपक्षाः-पराभूतदुःख-पराभवनीयशत्रुपक्षाः । कीदृशे युद्धे ? कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतार तरुणातुरयोधभीमे कुन्ताग्रेण भिन्ना-विदारिता ये गजाः-करिणस्तेषां यच्छोणितवारि-रक्तजलं तस्य वाहः-प्रवाहस्तस्मिन् वेगावतारेण-जवावतरणेन तरुणा-युवान आतुरा-भीता ये योधाः-सुभटास्तैर्भीमे-भयकारके । अनेनात्यन्तभयकारणत्वं युद्धस्य दर्शितम् ॥३९॥

इदानीं समुद्रप्रतिष्ठानां यानपात्रारूढानां भगवच्चिन्तनान्मज्जनभयं न भवतीति दर्शयितुमाह कविः-

**अम्भोनिधौ क्षुभितभीषणनक्रचक्र-**
**पाठीनपीठभयदोल्बणवाडवाग्नौ ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रङ्गतरङ्गशि[ख]रस्थितमानपात्रा-
स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥४०॥

नरा व्रजन्ति-गच्छन्ति-समुद्रमुल्लङ्घयन्तीत्यर्थः । किं कृत्वा ? विहाय-त्यक्त्वा । कं ? त्रासं-भयं मज्जनादेः । कुतो हेतोः ? स्मरणात्-चिन्तनात् । कस्य ? भवतः-तव । क्व ? अम्भोनिधौ-समुद्रे । कीदृशे ? क्षुभितभीषणनक्र-चक्रपाठीनपीठभयदोल्बणवाडवाग्नौ-क्षुभिताश्चलिता भीषणा-भयानका ये नक्रचक्र-पाठीनपीठाः-जीवविशेषाः, तैर्भयं-भीतिं ददाति स तथोक्तः, तथोल्बण-उद्भटो वाडवाग्निर्वरदावानलो यस्मिन् स तथोक्तः, पश्चात् पदद्वयस्य कर्मधारयः समासः, तस्मिन् । कीदृशाः सन्तः ? रङ्गत्तरङ्गशिखरस्थितयानपात्राः-रङ्गन्त-श्चलन्तो ये तरङ्गाः-कल्लोलास्तेषां शिखरं-अग्रं तस्मिन् स्थितं यानपात्रं-प्रवहणं येषां ते तथोक्ताः, ईदृशा अपि ॥४०॥

इदानीं भगवतः पादपद्मरजःपीयूषशरीरावगुण्डनस्य नराणां फलं दर्शयति स्तवकारः-

**उद्भूतभीषणजलोदरभारभुग्नाः**
**सो( शो )च्यां दशामुपगताः श्च्युतजीविताशाः ।**
**त्वत्पादपङ्कजरजोऽमृतदिग्धदेहा**
**मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥४१॥**

मर्त्या-मनुष्या भवन्ति-जायन्ते । कीदृशाः ? मकरध्वजतुल्यरूपाः-कामसमानाकाराः । कथम्भूताः सन्तः ? त्वत्पादपङ्कजरजोऽमृतदिग्धदेहाः -भवच्चरणपरागपीयूषम्रक्षितस(श)रीराः । पूर्वं कीदृशाः सन्तः ? उपगताः-प्राप्ताः । कां ? दशां-अवस्थाम् । कीदृशीं ? शोच्यां-शोचनीयां मरणयोग्याम् । किम्भूताः ? श्च्युतजीविताशाः-त्यक्तजीवनवाञ्छाः । तथोद्भूतभीषणजलोदर-भारभुग्ना-उत्पन्नभयङ्करोदरव्याधिविशेषप्राग्भारकुटिलीभूताः ॥४१॥

अधुना स्तवकारो भगवन्नाममन्त्रस्मरणस्य बन्धनभयापहारफलमाह-

**आपादकण्ठमुरुशृङ्खलवेष्टिताङ्गा गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः ।**
**त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः सद्यः स्वयं विगतबन्धभया भवन्ति ॥४२॥**

मनुजा-मानवाः स्वयं-आत्मन एव विगतबन्धभया-अपगतबन्धनत्रासा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति-सन्ति । कथं ? सद्यः-शीघ्रतरम् । किं कुर्वन्तः-स्मरन्तः चिन्तयन्तः । कं ? त्वन्नाममन्त्रं-भवदभिधानविद्याम् । कथं ? अनिसं(शं)-अनवरतम् । कीदृशाः सन्तः ? उरुशृङ्खलवेष्टिताङ्गाः-महाशृङ्खलावृतदेहाः । किं यावद् ? आपादकण्ठं-चरणगलं यावत् । पादाभ्यां प्रभृति गलप्रदेशं यावदित्यर्थः । तथा बृहन्निगडकोटिनिघृष्टजङ्घाः-महाप[1]........................ गाढं-अतितराम् ॥४२॥

अधुना सर्वं मत्तकरिप्रभृतिभयापहार(रः)फलं स्तवपठनस्य स्तवकारः प्राह-

**मत्तद्विपेन्द्रमृगराजदवानलाहि-सङ्ग्रामवारिधिमहोदरबन्धनोत्थम् ।**
**तस्याशु नाशमुपयाति भयं भियेव यस्तावकं स्तवमिमं मतिमानधीते ॥४३॥**

तस्य-नरस्य मतिमताशु-(मतिमतः आशु)-शीघ्रं भयं-त्रासो विनाशं-क्षयं भियेव-भयेवेन (भयेनेव) उपयाति-गच्छति, यो मतिमान्-बुद्धिमान् स्तवं-स्तवनमिमं-प्रत्यक्षं अधीते-पठति । कथम्भूतं ? तावकं-भवदीयम् । मत्तद्विपेन्द्र-मृगराजदवानलाहिसङ्ग्रामवारिधिमहोदरबन्धनोत्थं-क्षीबकरिराज-सिंह-दवाग्नि-सर्प-रण-समुद्र-जलोदर-संयमनप्रभवम् ॥४३॥

इदानीं स्तोत्रमालायाः कण्ठस्थितायाः फलमाह स्तवकारः, आत्मनाम च प्रदर्शयति-

**स्तोत्रस्त्रजं तव जिनेन्द्र ! गुणैर्निबद्धां**
**भक्त्या मया रुचिरवर्णविचित्रपुष्पाम् ।**
**धत्ते जनो य इह कण्ठगतामजस्त्रं**
**तं मानतुङ्गमवसा(शा) समुपैति लक्ष्मीः ॥४४॥**

तं पुरुषं, कीदृशं ? मानतुङ्गं-पूजामहान्तं अहङ्कारबृहन्तं वा । पुरुषस्याऽहङ्कारः प्रशस्यते[2] - - - - - निरहङ्कारस्य लोके भस्मतुल्यत्वात्, न परलोकमार्गे । लक्ष्मीः-श्रीः समुपैति-प्राप्नोति-आश्लिष्यति । कीदृशी ? अवसा(शा)-अपराधीना सती । यो जनो-नरो धत्ते-बिभर्ति । कां ? स्तोत्रस्त्रजं-स्तवनमालाम् । कस्य ? तव-भवतः । हे जिनेन्द्र ! - सकलकेवलिनाथ !। कथम्भूतां सतीं धत्ते ? कण्ठगतां-गलप्रदेशस्थिताम् । क्व ? इह-जगति ।

१. पाठः त्रुटितः । २. पत्रं त्रुटितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथं ? अजश्रं-अनवरतम् । कीदृशीं ? निबद्धां-र[चितां][१]- - - - - - - तव । कया ? भक्त्या-प्रकृष्टभावेन । केन ? मया-कर्त्रा । कीदृशीं ? विविधवर्णविचित्रपुष्पां-विविधा-नानाप्रकारा ये वर्णा-अक्षराणि, त एव विचित्राणि-नानारूपाणि पञ्चवर्णानि पुष्पाणि यस्यां सा तथोक्ता, ताम् । मालाऽपि सूत्रग्रथिता पञ्चवर्णजात्यादिपुष्पकलिता च कण्ठे-गलप्रदेशे ध्रियते ॥

**श्रीखण्डेल्लकगच्छसम्बन्धि-श्वेताम्बर श्रीशान्तिसूरि**विरचित-मानतुङ्गाचार्य-कविकृत-भक्तामराख्यस्तववृत्तिः परिसमाप्ता ॥

—x—

१. पाठः त्रुटितः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अज्ञातकर्तृका

# भक्तामरस्तव-सुखबोधिका वृत्ति:

सं. विजयशीलचन्द्रसूरि

भक्तामरस्तव परनी आ टीकानी ९ पानांनी, अशुद्धिप्रचुर प्रति निजी संग्रहमां मळी. कर्ता के लेखकनुं नाम नथी. अनुमानत: १८मा शतकमां लखायेली लागे छे. आ वृत्ति आम तो परम्परागत वाचनानुसारी ज छे. परन्तु आमां पण केटलांक स्थळोए महत्त्वना पाठभेदो जोवा तो मळे ज छे. जेमके-

पद्य ६मां 'मुखरीकुरुते' प्रयोग च्वि-प्रत्ययान्त होवानुं जाणीतुं छे, आ वृत्तिमां पण ते प्रमाणे अर्थ करेलो ज छे. छतां अहीं अच्व्यन्त प्रयोगरूपे पण ते दर्शावेल छे : 'मुखरी-वाचाल: कुरुते' आ रीतनो पदच्छेद अने अर्थ मनोरम पण लागे छे.

पद्य २३मां 'तमस: पुरस्तात्' पाठ मळे छे. प्रसिद्ध अने योग्य पाठ जोके 'परस्तात्' छे. टीकामां पण 'अन्धकारस्य अग्रे अर्थात् मध्यान्ध(मध्येऽन्ध) कारस्य' एवो अर्थ थयो छे.

पद्य २६मां प्रचलित पाठ छे 'जिन ! भवोदधिशोषणाय', अने अहीं जोवा मळतो पाठ 'जनभवोदधिशोषणाय'. अलबत्त, पहेलां 'जिन !' एवो पाठ विवरीने पछी ज 'जन' एवो पाठ दर्शावायो छे. तेनो अर्थ 'जनानां भवोदधि: जनभवोदधिस्तं शोषयतीति' एम कर्यो छे.

एज रीते, पद्य २७मां 'विविधाश्रयजातगर्वै:' एवो पाठ तो स्वीकार्यो ज छे, परन्तु त्यां विकल्पमां 'विबुधाश्रयजातगर्वै:' एम पाठ पण दर्शाव्यो छे, अने तेनी वृत्तिमां 'विबुधानां अन्यदेवानां आश्रय:' एम अर्थ करवामां आव्यो छे. मुख्य पाठ तरीके 'विबुधाश्रय०' अने वैकल्पिक पाठ 'विविधाश्रय०' लेवायो छे.

भक्तामर परनी विविध टीकाओ छे, जेमांथी घणी अप्रकाशित हशे. ते आ रीते प्रकाशमां आवे तो रसप्रद बने तेम छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भक्तामरप्रणि( ण )तमौलिमणिप्रभाणा**मिति । **यः** समिति । अस्य व्याख्या-किलेत्यव्ययं पदं सत्यागमनमङ्गलार्थवाचि । अहमपि प्रथमं जिनेन्द्रं स्तोष्ये । किं कृत्वा ? **जिनपादयुगं सम्यक् प्रणम्य** । जिनस्य प्रथमतीर्थकृतः पादौ-चरणौ, तयोर्युगं-युग्मं जिनपादयुगम् । सम्यक् त्रिका(क)रणशुद्ध्या, नत्वा । कथम्भूतं जिनपादयुगं ?, **भक्तामरप्रणतमौलिमणिप्रभाणां उद्योतकम्** । भक्ताश्च तेऽमराश्च भक्तामराः, तेषां प्रणता ये मौलयः, तेषु ये मणयः, [तेषां याः प्रभाः ताः] भक्तामरप्रणतमौलिमणिप्रभाः, तासां भक्तामरप्रणतमौलिमणिप्रभाणाम् । उद्योतयतीति उद्योतकम् । तत्प्रकाशकमित्यर्थः । पुनः कथम्भूतं जिनपादयुगं ?, दलितपापतमोवितानम् । दलितं-दूरीकृतं पापतमसो वितानं येन तत् दलितपापतमोवितानम् । तत्पुनः किम्भूतं जिनपादयुगं ?, **भवजले पततां जनानां युगादौ आलम्बनम्** । भव एव जलं भवजलम् । तस्मिन् भवजले-संसारसमुद्रे, पतन्तीति पतन्तः, तेषां पतताम् । युगस्य आदिः युगादिः, तस्मिन् युगादौ ।

तं इति कम् ?। यः सुरलोकनाथः(थैः) स्तोत्रैः संस्तुतः । सुष्ठु राजन्ते इति सुराः, तेषां लोको-जगत् स्वर्गः, तस्य नाथैः-प्रभृतिभिः (? भूपतिभिः ?) सुरलोकनाथैः । संस्तुतः-सम्यक् स्तुतः । कथम्भूतं (तैः) सुरलोकनाथैः ?, सकलवाङ्मयतत्त्वबोधात् उद्भूतबुद्धिपटुभिः । 'वाचि विकारो वाङ्मयं, सकलं च तत् वाङ्मयं च सकलवाङ्मयं, तस्य तत्त्वं सकलवाङ्मयतत्त्वं, तस्य बोधः सकल वाङ्मयतत्त्वबोधः, तस्मात् । उद्भूतश्चासौ बुद्धिश्च उद्भूतबुद्धिः, तया पटवः उद्भूतबुद्धिपटवः, तैः । कथम्भूतैः स्तोत्रैः ?, **जगत्त्रितयचित्तहरैः** । जगतां त्रितयं जगत्त्रितयं, जगत्त्रितयस्य चित्तं जगत्त्रितयचित्तं, तस्य हराणि जगत्त्रितय-चित्तहराणि तैः । पुनः किं० स्तौत्रैः ?, उदारैः-प्रधानैः ॥१-२॥ युग्मम् ॥

**बुद्ध्येति** । हे विबुधार्चितपादपीठ ! अहं विगतत्रपः अस्मि । विबुधैर्देवैः अर्चितं पादपीठं यस्य स विबुधार्चितपादपीठः । वि-विशेषेण गता त्रपा यस्मात् स विगतत्रपः । निर्लज्ज इत्यर्थः । कथम्भूतोऽहम् ?, बुद्ध्या विनाऽपि स्तोतुं-स्तवनं कर्तुं समुद्यतमतिः । उक्तमर्थमर्थान्तरन्यासेन द्रढयति-बालं विहाय जलसंस्थितं इन्दुबिम्बं-चन्द्रमण्डलं अन्यजनः सहसा ग्रहीतुं क

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इच्छति ? ॥३॥

**वक्तु**मिति । हे गुणसमुद्र ! ते गुणान् बुद्ध्या सुरगुरुप्रतिमः कः क्षमः-कः समर्थः ? । गुणानां समुद्रः गुणसमुद्रः, तत्सम्बोधनं क्रियते-हे गुणसमुद्र !। सुरगुरुणा प्रतिमीयते इति सुरगुरुप्रतिमः-बृहस्पतितुल्योऽपि । कथम्भूतान् ?, शशाङ्ककान्तान्, शशाङ्कवत् कान्ताः शशाङ्ककान्ताः, तान् शशाङ्ककान्तान् । उक्तमर्थमर्थान्तरन्यासेन द्रढयति-अम्बुनिधिं-समुद्रं भुजाभ्यां तरीतुं कः अलं-कः समर्थः ? न कोऽपीत्यर्थः । कथम्भूतं अम्बुनिधिम् ?, कल्पान्तकालपवनोद्धतनक्रचक्रं - कल्पान्तकालस्य पवनः, तेन उद्धता-ऊर्ध्वं गता नक्रचक्रा यस्मिन् स कल्पान्तकालपवनोद्धतनक्रचक्रस्तम् ॥४॥

सोऽहमिति । स अहं तथापि भक्तिवशात् तव स्तवं कर्तुं प्रवृत्तः अस्मि सावधानो जातोऽस्मि । कथम्भूतः अहम् ?, विगतशक्तिः अपि, वि-विशेषेण गता शक्तिर्यस्य स विगतशक्तिः । अधुना । उक्तमर्थमर्थान्तरन्यासेन द्रढयति-मृगः निजशिशोः परिपालनार्थं-स्वपुत्ररक्षार्थं किं न अभ्येति-किं न सन्मुखं याति ? अपि तु अभ्येत्येव । किं कृत्वा ? प्रीत्या-स्वस्नेहेन आत्मवीर्यं-स्वपराक्रमं अविचार्य-न विचार्य इत्यर्थः ॥५॥

अल्पश्रुतमिति । हे मुनीश ! त्वद्भक्तिः एव बलात् मां मुखरी-वाचालः कुरुते । अमुखरं मुखरं कुरुते इति मुखरीकुरुते । कथम्भूतं मां ?, अल्पश्रुतं अल्पं-स्तोकं श्रुतं यस्य सः [तं] अल्पश्रुतम् । पुनः कथम्भूतं मां ?, श्रुतवतां परिहासमा(धाम) । श्रुतं विद्यते येषां ते श्रुतवन्तः, तेषां परिहासस्य धाम-परिहासधाम । उक्तमर्थमर्थान्तरन्यासेन द्रढयति-किल इति निश्चयेन । यत् कोकिलः मधौ मधुरं विरौति तत् चारुचूतकलिकानिकरैकहेतुः । चारवश्च ताः चूतकलिकाश्च चारुचूतकलिकाः । तासां निकरः-समूहः, स एवैको-ऽद्वितीयो हेतुः चारुः ॥६॥

हे स्वामिन् ! शरीरं भजती(न्ती)ति शरीरभाजः, तेषां पुरुषाणां अशेषं पापं त्वत्संस्तवेन क्षणात् क्षयं उपैति-प्राप्नोतीत्यर्थः । कथम्भूतं पापं ?, भवसन्ततिसन्निबद्धम् । भवानां सन्ततिर्भवसन्ततिः । भवसन्तत्या सं-सम्यक् प्रकारेण निबद्धं-दृष्टं बद्धं भवसन्ततिसन्निबद्धम् । पुनः कथम्भूतं पापं ?, आक्रान्तलोकम् । पुनः किंविशिष्टं पापं ?, उत्प्रेक्षते-पापं कमिव ? सूर्यांशुभिन्नं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शार्वरं-सूर्यस्य अंशवः-[किरणाः] तैः सूर्यांशुभिर्भिन्नं-स्फेटितं सूर्यांशुभिन्नं, शर्वर्यां भवं शार्वरं अन्धकारमिव । कथम्भूतं अन्धकारं ?, आक्रान्तलोकम् । पुनः कथम्भूतं अन्धकारं ?, अलिनीलम् - भ्रमरवत् नीलमित्यर्थः ॥७॥

मत्वेति । हे नाथ ! तव संस्तवनं आरभ्यते-क्रियते । किं कृत्वा ?, इति मत्वा-ज्ञात्वा । इतीति किम् ?, तव प्रभावात् । सतां-सज्जनानां चेतः हरिष्यति । कथम्भूतेन मया ?, तनुधियाऽपि - तनुः-स्वल्पा धीर्यस्य स तनुधीः, तेन । उक्तमर्थमर्थान्तरन्यासेन द्रढयति-ननु इति निश्चयेन । नलिनीदलेषु उदबिन्दुः मुक्ताफलद्युतिं उपैति-प्राप्नोति । नलिन्या दलानि नलिनीदलानि, तेषु नलिनीदलेषु-कमलनीपत्रेषु । उदस्य बिन्दुः उदबिन्दुः । मुक्ताफलस्य द्युतिः मुक्ताफलद्युतिस्तम् ॥८॥

**आस्तामिति** । हे जिन ! तव स्तवनं दूरे आस्ताम् । त्वत्संकथापि जगतां दुरितानि-कष्टानि हन्ति । सहस्रकिरणः - सूर्यः दूरे आस्ताम् । सहस्र(स्रं)-किरणं यस्य स सहस्रकिरणः । सहस्रकिरणस्य प्रभा एव पद्माकरेषु जलजानि विकाशिभाञ्जि कुरुते । पद्मानां आकराः पद्माकराः, तेषु पद्माकरेषु-तडागेषु, जलाज्जातानि जलजानि-कमलानि विकाशं भाजन्तीति विकाशभाञ्जि ॥९॥

**नान्येति** । हे भुवनभूषण ! हे भूतनाथ ! भूतैर्गुणैर्भवन्तं ऽभिष्टुवन्तः पुरुषाः भुवि-पृथिव्यां भवतः तुल्या भवन्ति इति न अद्भुतं न आश्चर्यम् । उक्तमर्थमर्थान्तरन्यासेन द्रढयति-ननु इति निश्चयेन । वा-अथवा तेन स्वामिना किम् ? यः स्वामी भूत्याऽऽश्रितं-सेवकं इह विश्वे आत्मसमं न करोति । भुवनस्य भूषणं भुवनभूषणं, तत्सम्बोधनं क्रियते । हे भुवनभूषण !। अथवा भुवनस्य भूषणभूतः भुवनभूषणभूतः, तत्सम्बोधनं क्री(क्रि)यते- हे भुवनभूषण !। अथवा भूतानां नाथ भूतनाथ, तत्सम्बोधनम् ॥१०॥

**दृष्ट्वेति** । हे स्वामिन् ! जनस्य-लोकस्य चक्षुः । भवन्तं दृष्ट्वा अन्यत्राऽन्यस्मिन् देवे तोषं-सन्तोषं न उपयाति-न प्राप्नोति । कथम्भूतं भवन्तं? अनिमेषविलोकनीयम् । अनिमेषं यथा स्यात्तथा विलोकनीयः ऽन(नि)मेषविलो-कनीयस्तम् । उक्तमर्थमर्थान्तरन्यासेन द्रढयति-दुग्धसिन्धोः-क्षीरसमुद्रस्य पयः पीत्वा, जलनिधेः-समुद्रस्य, क्षारं जलं असितुम् - पातुम् कः इच्छेत् ? - कः वाञ्छेत् ? कथम्भूतं दुग्धसिन्धोः पयः ?, शशिकरद्युति०, शशिनः कराः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शशिकरा:, तद्वत् द्युतिर्यस्य स, तत् शशिकरद्युति ॥११॥

हे त्रिभुवनैकललामभूत ! यैः परमाणुभिः निर्मापितः - त्वं रचितः असि । खलु-निश्चयेन, तेऽणवः ऽपि-ते परमाणु(ण)वः अपि, पृथिव्यां तावन्त एव, हि इति निश्चयेन । यत्-यस्मात् कारणात्, ते-तव समानं अपरं रूपं नास्ति । त्रिभुवनस्य एकं च तत् ललाम च त्रिभुवनैकललाम-त्रिभुवनैकललामभूत !। कथम्भूतैः परमाणुभिः ? शान्तरागरुचिभिः, शान्तरागस्य-शान्तरसस्य रुचिर्येषां ते शान्तरुचयस्तैः, ऽथवा शान्ता-दूरीभूताः रागस्य रुचिर्येभ्यस्ते शान्तरागरुचयस्तैः ॥१२॥

**वक्त्रमिति** । हे स्वामिन् ! ते-तव वक्त्रं क्व ? च-पुनः तत् निशाकरस्य-चन्द्रस्य बिम्बं क्व ?। यत् निशाकरस्य बिम्बं वासरे पाण्डुपलासकल्पं भवति । पाण्डु च तत् पलाशं पाण्डुपलाशं, पाण्डुपलाशेन कल्पं पाण्डुपलाशकल्पं, कथम्भूतं वक्त्रं ? सुरनरोरगनेत्रहारि । सुराश्च नराश्च उरगाश्च सुरनरोरगाः, तेषां नेत्रानि(णि) हरन्तीति एवं शीलं सुरनरोरगनेत्रहारि । पुनः कथम्भूतं वक्त्रम् ? निश्शेषनिर्जित-जगत्त्रितयोपमानम् । निश्शेषेण निर्ज्जितं जगत्त्रये उपमानं येन तत् निश्शेषनिर्ज्जितजगत्त्रितयोपमानम् । कथम्भूतं बिम्बं ? कलङ्कमलिनम् ? कलङ्केन मलिनं कलङ्कमलिनम् ॥१२॥

**सम्पूर्णेति** ॥ हे त्रिजगदीश्वर ! तव गुणाः त्रिभुवनं लङ्घयन्ति-ऽतिक्रामन्ति । त्रीणि च तानि जगन्ति च त्रिजगन्ति, त्रिजगतां ईश्वरः त्रिजगदीश्वरः तत्सम्बोधनं हे त्रिजगदीश्वर !। कथम्भूता गुणाः ? सम्पूर्णमण्डलशशाङ्ककलाकलापशुभ्राः । सम्पूर्णं मण्डलं यस्य सः सम्पूर्णमण्डलश्चासौ शशाङ्कश्च सम्पूर्णमण्डलशशाङ्कस्तस्य कलाकलापः सम्पूर्णमण्डलशशाङ्ककलाकलापः, तद्वत् शुभ्राः । ये मनुष्या एकनाथं संश्रितान् (संश्रितास्तान्) यथेष्टं सञ्चरतः कः निवारयति ? ॥१४॥

**चित्रमिति** ॥ हे जिन ! यदि त्रिदशाङ्गनाभिः ते-तव मनः मनाक् अपि-स्तोकमपि विकारमार्ग्गं न नीतं, अत्र किं चित्रम् ?। उक्तमर्थमर्थान्तरन्यासेन द्रढयति-कल्पान्तकालमरुता किं मन्दराद्रिशिखरं कदाचित् चलितम् ? कथम्भूतेन कल्पान्तमरुता ? चलिता अचला यस्मात् स चलिताचलस्तेन चलिताचलेन ॥१५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**निर्धूमवर्त्तीति** ॥ हे नाथ ! त्वं अपरदीपः ऽसि । कथम्भूतः त्वं दीपः ? निर्धूमवर्त्तिः । धूमश्च वर्त्तिश्च धूमवर्त्ती । निर्गतौ धूमवर्त्ती यस्मात् स निर्धूमवर्त्तिः, धूमकालुष्यं वर्त्तिः - कामदश(शा)-ताभ्यां रहितः इत्यर्थः । पुनः कथम्भूतः त्वं दीपः ? अपवर्ज्जिततैलपूरः । अपवर्ज्जितं तैलपूरं यस्मात् स अपवर्ज्जिततैलपूरः । कथम्भूतः त्वं दीपः ? कृत्स्नं-समस्तं जगत्त्रयं प्रग(क)टीकरोषि ? पुनः कथम्भूतः त्वं दीपः ? जगत्प्रकाशः । जगति प्रकाशो यस्य स जगत्प्रकाशः ॥१६॥

**नास्तमिति** ॥ हे मुनीन्द्र ! मुनीनां इन्द्रः मुनीन्द्रः, तत्सम्बोधनं क्रियते - हे मुनीन्द्र ! । लोके त्वं सूर्यातिशायिमहिमाऽसि । सूर्यात् अतिशायी महिमा - महात्मि(त्म्यं)यस्य स सूर्यातिशायिमहिमा, तदेव दर्शयति । त्वं कदाचित् अस्तं न उपयासि - न प्राप्नोषि । पुनः त्वं राहुगम्यः न ऽसि । हे स्वामिन् ! पुनः त्वं सहसा-शीघ्रं युगपत्-समकालं जगन्ति - विश्वानि स्पष्टीकरोषि - प्रकटीकरोषीत्यर्थः । पुनः त्वं अम्भोधरोदरनिरुद्धमहाप्रभावः न । अम्भोधराणां उदरं अम्भोधरोदरम्, अम्भोधरोदरेण निरुद्धो महाप्रभावो यस्य स अम्भोधरोदर-निरुद्धमहाप्रभावः । मेघमध्यावृतमहातेजा न वर्त्तासो (वर्तसे) ॥१७॥

**नित्यो० इति** । हे स्वामिन् ! तव मुखाब्जं-मुखकमलं अपूर्वशशाङ्क-बिम्बम् । विभ्राजते-शोभते, मुखं अब्जं मुखाब्जं, अपूर्वं च तत् शशाङ्कबिम्बं मुखाब्जं, किं कुर्वन् ?, जगद्विद्योतयत्-प्रकाशयत् । कथम्भूतं मुखाब्जं ?, नित्योदयं-नित्यं-सर्वदा उदयो यस्य तत् नित्योदयम् । पुन- कथम्भूतं मुखाब्जं ? दलितमोहमहान्धकारं-दलितं-दूरीकृतं मोहमहान्धकारं । अथवा मोहस्य महान्धकारं मोहमहान्धकारं दलितं । पुनः कथम्भूतं मुखाब्जं ? राहुवदनस्य गम्यो न, राहोर्वदनं राहुवदनं-तस्य । पुनः कथम्भूतं मुखाब्जं ? वारिदानां - मेघानां न गम्यम् । पुनः किंविशिष्टं ? अनल्पकान्ति - न अल्पा अनल्पा कान्तिर्यस्य तत् ॥१८॥

**किमिति** ॥ हे नाथ ! तमस्सु-अन्धकारेषु । युष्मन्मुखेन्दुदलितेषु सत्सु, शर्वरीषु शशिना किं ? वा-ऽथवा,ऽह्नि-दिवसे विवस्वता-सूर्येण किम् ?। युष्माकं मुखं युष्मन्मुखं, युष्मन्मुखं एव इन्दुः युष्मन्मुखेन्दुः । तेन दलितानि युष्मन्मुखेन्दुदलितानि तेषु । उक्तमर्थं मर्थान्तरन्यासेन द्रढयति - जीवलोके -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विश्वे निष्पन्नशालिवनशालिनि सति जलधरैः-मेघैः कियत् कार्यं ?। निष्पन्नानि च तानि तानि शालिवनानि च निष्पन्नशालिवनानि तैः शालते-शोभते इत्येवं शीलं निष्पन्नशालिवनशालि तस्मिन् । कथम्भूतैः मेघैः ? जलभारनम्रैः । जलस्य भारेण नम्राः तैः जलभारनम्रैः ॥१९॥

**ज्ञानमिति** ॥ हे स्वामिन् ! त्वयि यथा ज्ञानं विभाति तथा-एवं हरिहरादिषु नायकेषु न विभाति । कथम्भूतं ज्ञानं ? कृतावकाशं । कृतः अवकाशो येन तत् कृतावकाशस्तम् । उक्तमर्थमर्थान्तरन्यासेन द्रढयति-स्फुरन् मणिषु तेजः-प्रभा यथा महत्त्वं-गौरवं याति-प्राप्नोति, तु-पुनः एवं काचशकले न याति । स्फुरन्तो ये मणयः स्फुरन्मणयः, तेषु, भास्वद्वैडूर्य-पुष्परागेन्द्रनीलादि-रत्नेषु । काचशकले कथम्भूतेऽपि ? किरणाकुले अपि । किरणैः आकुलं किरणाकुलं तस्मिन् किरणाकुले अपि ॥२०॥

**मन्येति** ॥ हे स्वामिन् ! हरिहरादय एव दृष्टा-विलोकिता वरं - प्रधानं, अहं एवं मन्ये । येषु सुरेषु दृष्टेषु, हृदयं - चित्तं, त्वयि-भवद्विषये, तोषं-प्रमोदं एति-प्राप्नोतीत्यर्थः । हे नाथ ! भवता वीक्ष्य(क्षि)तेनावलोकितेन किम् ? येन भवता वीक्ष्य(क्षि)तेन भुवि-पृथिव्यां ऽन्यः कश्चिन्मनः भवान्तरेऽपि न हरति ॥२१॥

**स्त्रीणामिति** ॥ हे स्वामिन् ! स्त्रीणां शतानि शतशः पुत्रान् जनयन्ति । त्वदुपमं सुतं अन्या जननी न प्रसूता । उक्तमर्थमर्थान्तरन्यासेन द्रढयति-सर्वा दिशः भानि-नक्षत्राणि दधति-धारयन्ति । सहस्त्ररश्मि सूर्यं प्राची एव दिग्-पूर्वा एव दिग् जनयति । सहस्त्र(स्त्रा)रश्मयो यस्य स सहस्त्ररश्मिस्तम् । किम् ? सहस्त्ररश्मि स्फुरदंशुजालं स्फुरत्-देदीप्यमानं अंशूनां-किरणानां जालं यस्य स स्फुरदंशुजालस्तं ॥२२॥

**त्वामिति** ॥ हे स्वामिन् ! मुनयः-ज्ञानिनः त्वां परमं पुमांसं-पुरुषं आमनन्ति-कथयन्ति । हे स्वामिन् ! तमसः पुरस्तात्-अन्धकारस्याग्रे अर्थात् मध्यान्धकारस्य अमलं-निर्मलं आदित्यवर्णं-सूर्यरूपं आमनन्ति । हे मुनीन्द्र ! योगिनः त्वां एव सम्यक् उपलभ्य-सम्यक्-प्राप्य मृत्युं जयन्ति-कालं निवारयन्ति । हे मुनीन्द्र ! शिवपदस्य मोक्षस्य त्वत्तः-अन्यः शिवः पन्था न - निरुपद्रवो मार्गो न ॥२३॥

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

**त्वामव्ययमिति** ॥ हे स्वामिन् ! सन्तः-सज्ज्ञानाः त्वां अव्ययं-न विद्यते व्ययो यस्य स अव्ययस्तं अव्ययम्, अवसिनं प्रवदन्ति, कथयन्ति । पुनः त्वां विभुं-समर्थं प्रवदन्ति । पुनः त्वां अचिन्त्यं प्रवदन्ति । पुनः त्वां असंख्यं-संख्यारहितं प्रवदन्ति । पुनः त्वां ब्रह्माणं प्रवदन्ति । पुनः त्वां ईश्वरं-स्वामिनं प्रवदन्ति । पुनः त्वां अनन्तं-न विद्यते अन्तो यस्य स अनन्तस्तं प्रवदन्ति । अनेककंदर्प्पेषु केतुरिव केतुः अनङ्गकेतुस्तम् कंदर्प्पदाहं च । पुनः त्वां योगीश्वरं प्रवदन्ति । पुनः त्वां अनेकं प्रवदन्ति । पुनः त्वां एकं प्रवदन्ति । पुनः त्वां अमलं ज्ञानस्वरूपं प्रवदन्ति । ज्ञानं स्वरूपं यस्य स ज्ञानस्वरूपस्तम् ॥२४॥

**बुद्ध इति** ॥ हे स्वामिन् ! बुद्धदर्शनिनां देवः त्वं एव असि । कस्मात्? विबुधार्चितबुद्धिबोधात् । विबुधैः-पण्डितैः-देवैर्वा अर्चितः ज्ञानस्य प्रकाशो यस्य स विबुधार्चितबुद्धिबोधः, तस्मात् । शङ्करः त्वमसि । भुवनत्रयशङ्करत्वात्, भुवनत्रये शं-सुखं करोतीति भुवनत्रयशङ्करः तस्य भावः भुवनत्रयशङ्करत्वं, तस्मात् । हे धीर ! धाता त्वमसि । कस्मात् ? शिवमार्गविधेः-मोक्षमार्गस्य विधेः विधानात् करणात् । हे भगवन् ! व्यक्तं-प्रकटं पुरुषोत्तमः त्वं एव असि । पुरुषेषु उत्तमः पुरुषोत्तमः ॥२५॥

**तुभ्यमिति** ॥ हे नाथ ! तुभ्यं नमः । कथम्भूताय तुभ्यं ? त्रिभुवनार्त्तिहराय । त्रीणि च तानि भुवनानि च त्रिभुवनानि, तेषां अर्त्तिं हरतीति त्रिभुवनार्त्तिहरस्तस्मै । पुनः हे नाथ ! तुभ्यं नमः । कथम्भूताय तुभ्यम् ? क्षितितलस्य अमलं च तद् भूषणं च क्षितितलामलभूषणम्, तस्मै क्षितितलामलभूषणाय । पुनः हे नाथ ! तुभ्यं [नमः । कथम्भूताय तुभ्यम् ?]; त्रिजगतः परमेश्वराय । त्रयाणां जगतां समाहारस्त्रिजगत् तस्य त्रिजगतः । परश्चासौ ईश्वरश्च परमेश्वरस्तस्मै परमेश्वराय । पुनः हे जिन ! तुभ्यं नमः । कथम्भूताय तुभ्यं ? भवोदधिशोषणाय । भव एव उदधिः, तं शोषयन्ती- (ती)ति भवोदधिशोषणस्तस्मै । अथवा जनानां भवोदधिः जनभवोदधिस्तं शोषयन्ती(ती)ति जनभवोदधिशोषणस्तस्मै ॥२६॥

**को विस्मयेति** ॥ हे मुनीश ! मुनीनां - ईशः मुनीशः तत्सम्बोधनं क्रियते-हे मुनीश! । नाम इति प्रसिद्धौ । हे स्वामिन् ! यदि अशेषैः -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समस्तैर्गुणैः, त्वं निरवकाशतया-नैरन्तर्येण संश्रितः, दोषैः स्वप्नान्तरेपि कदाचित् ऽपि न ईक्षितः-विलोकितः ऽसि, अत्र को विस्मयः?-किमाश्चर्यम् ?। कथम्भूतैः दोषैः ? उपात्तविबुधाश्रयजातगर्वैः । उपात्तः-अङ्गीकृतो यो विबुधानां अन्यदेवानां आश्रयः उपात्तविबुधाश्रयस्तेन जातगर्वो येषां ते उपात्तविबुधाश्रय-जातगर्वास्तैः । अथवा उपात्तो यो विविधाश्रयो नानाप्रकार आश्रय उपात्तविविधाश्रय स्तेन जातः गर्वो येषां ते उपात्तविविधाश्रयजातगर्वास्ते । कोऽर्थः ? यदा हि त्वं सम्पूर्णैर्गुणैः कृत्वा निरन्तरत्वेन आश्रितः तदा दोषाणां रच्यतं वशीरे (तव शरीरे) स्थानाभावात् दोषैर्विचारितं - ''अत्र चेदस्माकं स्थानं नास्ति, तदस्माकं अपरदेवानां शरीरं वर्त्तते'' इति विचार्य दोषा अपरदेवेषु स्थित्वा गर्वं चक्रुरित्यर्थः ॥२७॥

**उच्चैरिति** ॥ हे स्वामिन् ! उच्चैः अशोकतरुसंश्रितम् । उन्नताशोकवृक्ष समीपाश्रितं भवतो रूपं नितान्तं-अत्यन्तं विभाति । कथम्भूतं रूपं ? उन्मयूखम् । - उद्गतकिरणम् । उत्प्रेक्षते-भवतो रूपं किमिव ? पयोधरपार्श्ववर्त्ति-मेघसमीपस्थितं रवेः-सूर्यस्य बिम्बमिव । कथम्भूतं बिम्बं ? रवेर्बिम्बस्य स्पष्टोल्लसत्किरणं - स्पष्टाः-प्रकटाः, उल्लसन्तः किरणा यस्य तत् । पुनः कथम्भूतं ? अस्ततमोवितानम् । अस्तं तमोवितानं येन तत् अस्ततमोवितानम् ॥२८॥

**सिंहेति** ॥ हे स्वामिन् ! तव वपुः सिंहासने विभ्राजते-शोभते इत्यर्थः । कथम्भूते सिंहासणि(ने)मणिमयूखशिखाविचित्रे । मणिकिरणसूचीभिः रमणीये । किंविशिष्टं वपुः ? कनकावदातम् । स्वर्णवद् गौरं । इव इति उत्प्रेक्ष्यते, कस्मिन्, कं इव ? तुङ्गोदयाद्रिशिरसि सहस्ररश्मेः । सूर्यस्य बिम्बं इव । तुङ्गं च तत् उदयाद्रेः शिरश्च तुङ्गोदयाद्रिशिरस्तस्मिन् । कथम्भूतं ? सहस्ररश्मेः वियति-आकाशे विलसत्-अंशुलतावितानं यस्य तत् ॥२९॥

**कुन्दावदेति** ॥ तव वपुः विभ्राजते-शोभते । कथम्भूतं वपुः ? कुन्दावदातचलचामरचारुशोभं, कुन्दवत् अवदाते - चले चामरे, ताभ्यां चारु प्रधाना शोभा यस्य तत् । कथम्भूतं वपुः ? कलधौतकान्तं । कलधौतवत् कान्तं कलधौतकान्तम् वपुः । कमिव ? सुरगिरेः उच्चैस्तटमिव । कथम्भूतं तटम् ? शातकौम्भं । पुनः कथम्भूतं तटं ? उद्यच्छशाङ्कशुचिनिर्झरवारिधारं । उद्यत् चासौ शशाङ्कश्च उद्यच्छशाङ्कः तद्वत् शुचयो निर्मला वारिधारा यस्य तत् ॥३०॥

**छत्रेति** ॥ उच्चैःस्थितं तव छत्रत्रयं विभाति-शोभते । कथम्भूतं छत्रं ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शशाङ्ककान्तं-शशाङ्कवत् मनोहरमित्यर्थः । पुनः कथम्भूतं छत्रम् ? स्थगित भानुकरप्रतापं, स्थगितः आच्छादितः-भानुकराणां प्रतापो येन तत् । पुनः कथम्भूतं छत्रम् ? मुक्ताफलप्रकरजालविवृद्धशोभम् । मुक्ताफलानां प्रकराः मुक्ताफलप्रकराः तेषां जालेन विवृद्धा शोभा यस्य तत् । उत्प्रेक्षते-छत्रत्रयं किं कुर्वत् इव ? त्रिजगतः परमेश्व[र]त्वं प्रख्यापयत् इव ॥३१॥

**उन्निद्रेति** ॥ हे जिनेन्द्र ! तव पादौ यत्र भूमौ पदानि गमनस्थानरूपाणि धत्तोधारयतः,विबुधा देवास्तत्र धरापीठे पद्मानि रचयन्ति । किंविशिष्टौ पादौ ? उन्निद्रहेमनवपङ्कजपुञ्जकान्तिः । उन्निद्रानि विकश्वराणि हेम्नः नवानि नूतनानि नवसंख्यकानि वा पङ्कजानि उन्निद्रहेमनवपङ्कजानि तेषां पुञ्ज उन्निद्रहेमनव-पङ्कजपुञ्जस्तस्य कान्तिः उन्निद्रहेमनवपङ्कजपुञ्जकान्तिः तया पर्युल्लसन्ती नखमयूखानां शिखा उन्निद्रहेमनवपङ्कजपुञ्जकान्तिपर्युल्लसन्नखमयूखशिखा तया अभिरामौ ॥३२॥

**इत्थमिति** ॥ हे जिनेन्द्र ! धर्मोपदेशनविधौ यथा तव विभूतिः इत्थं अभूत् तथा अपरस्य न । अथ उक्तमर्थमर्थान्तरन्यासेन द्रढयति - यादृक् दिनकृतः-सूर्यस्य प्रभा भवति तादृक् ग्रहगणस्य कुतः ? कथम्भूता दिनकृतः ? प्रहतान्धकारा, प्रकर्षेण हतं अन्धकारं यया सा प्रहतान्धकारा । ग्रहगणस्य कथम्भूतस्यापि ? विकाशिनः-अपि । विकासो विद्यते यस्य स विकाशी, तस्य विकाशिनः ॥३३॥

**श्च्योतन्मदेति** ॥ हे स्वामिन् ! भवत्-आश्रितानां-भवत्-सेवकानां, इभं-हस्तिनं आपतन्तं दृष्ट्वा भयं न भवति । कथम्भूतं इभं ? उद्धतम् । उत्कटमित्यर्थः । पुनः कथम्भूतं इभं ? ऐरावताभं ऐरावत इव आभा-कान्तिर्यस्येति ऐरावताभस्तं ऐरावताभं । पुनः कथम्भूतं इभम् ?, श्च्योतन्मदा-विलविलोलक-पोलमूलं, मत्तभ्रमद्भ्रमरनादविवृद्धकोपम् । श्च्योतंश्चासौ मदः श्च्योतन्मदः, तेन आविलं च तत् विलोलकपोलमूलं श्च्योतन्मदाविलविलोलक-पोलमूलं । मत्ताश्च ते भ्रमन्तो भ्रमराश्च श्च्योतन्मदाविलविलोलकपोल-मूलमत्तभ्रमद्भ्रमराः । तेषां नादेन विवृद्धः कोपो यस्य स श्च्योतन्मदाविल-विलोलकपोलमूलमत्तभ्रमद्-भ्रमरनादविवृद्धकोपस्तम् ॥३४॥

**भिन्नेति** ॥ हरिणाधिपः - सिंहः, अपि ते-तव क्रमयुगाचलसंश्रितं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाक्रामति । क्रमयोर्युगं-क्रमयुगं तदेव अचलः [तं संश्रितः] क्रमयुगाचलसंश्रितः, तं क्रमयुगाचलसंश्रितम् । कथम्भूतः हरिणाधिपः ? बद्धफालः । कथम्भूतं सेवकं ? क्रमगतं-समीपप्राप्तम् । पुनः कथम्भूतः हरिणाधिपः ? भिन्नेभकुम्भगल-दुज्वलशोणिताक्त-मुक्ताफलप्रकरभूषितभूमिभागः । भिन्नाश्च ते इभकुम्भाश्च भिन्नेभकुम्भास्तेभ्यो गलत् क्षरच्च तत् उज्ज्वलं शोणितं च भिन्नेभकुम्भगलदुज्जूल-शोणितं, तेन अक्तो-मिलितो मुक्ताफलानां प्रकरः भिन्नेभकुम्भगलदुज्वलशोणिताक्त-मुक्ताफलप्रकरस्तेन भूषितो भूमिभागो येन सः ॥३५॥

**कल्पान्तेति** ॥ हे स्वामिन् ! त्वन्नामकीर्त्तनजलं शेषं समस्तं दावानलं शमयति । तव नाम त्वन्नाम त्वन्नाम्नः कीर्त्तनजलं-त्वन्नामकीर्त्तनजलम् । कथम्भूतं दावानलं ? कल्पान्तकालपवनोद्धतवह्निकल्पम् । कल्पान्तकालस्य पवनेन उद्धतश्चासौ वह्निश्च तेन कल्पः कल्पान्तकालपवनोद्धतवह्निकल्पस्तम् । पुनः कथम्भूतं दावानलं ? ज्वलितं-देदीप्यमानमित्यर्थः । कथम्भूतं दावानलम् ? उज्ज्वलम्, निर्धूममित्यर्थः । पुनः कथम्भूतं दावानलम् ? उत्स्फुलिङ्गं । उत्-ऊर्ध्वा स्फुलिङ्गा यस्य स उत्स्फुलिङ्गस्तम् । पुनः कथम्भूतं । सन्मुखं आपतन्तं-आगच्छन्तं दावानलम् । किं कर्त्तुमिच्छन्तं इव ? । विश्वं जिघत्सुं इव, अत्तुमिच्छुः जिघत्सुः तं जिघत्सुम् ॥३६॥

**रक्तेक्षणमिति** ॥ हे जिन ! यस्य पुंसः हृदि त्वन्नामनागदमनी ऽस्ति स पुरुषः निरस्तशङ्कः सन्-निःशङ्कः सन् क्रमयुगेन-चरणयुगेन फणिनं आपतन्तं-आगच्छन्तं आक्रामति-निवारयति । तव नाम - त्वन्नाम त्वन्नामनागदमनी जटिका । कथम्भूतं फणिनं ? उत्फणिनं (उत्फणं) । उत्-ऊर्ध्वं फणो यस्य स उत्फणस्तम् । पुनः कथम्भूतं फणिनम् ? रक्तेक्षणं; रक्ते ईक्षणे यस्य स रक्तेक्षणस्तम् । पुनः कथम्भूतं फणिनम् ? समदकोकिलकण्ठनीलं । समदश्चासौ कोकिलश्च समदकोकिलस्तस्य कण्ठवन्नीलः समदकोकिलकण्ठनीलस्तम् । पुनः कथम्भूतं फणिनं ? क्रोधोद्धतं क्रोधेन उद्धतः उत्कटः क्रोधोद्धतस्तम् ॥३७॥

**वल्गेति** ॥ हे जिन ! त्वत्कीर्त्तनाद्, बलवतामपि भूपतीनां-राजानां (राज्ञां) बलं-कटकं, आजौ-रणे आशु-शीघ्रं भिदां-भेदं उपैति-प्राप्नोति । कथम्भूतं बलम् ? वल्गत्तुरङ्गगजगर्जितभीमनादं । वल्गत्तुरङ्गाश्च गजानां गर्जितानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वल्गत्तुरङ्गगजगर्जितानि तैः भीमो नादो यस्मिन् तत् । धावमानअश्वगजगर्जारव-भीषण-अव्यक्तशब्दे । उत्प्रेक्षते-बलं कमिव ? उद्यद्दिवाकरमयूखशिखापविद्धं । तम इव-अन्धकारं इव । उद्यंश्चासौ दिवाकरश्च उद्यद्दिवाकरस्तस्य मयूखाः-किरणास्तेषां शिखाभिः अपविद्धं-स्फुटितं उद्यद्दिवाकरमयूखशिखापविद्धं, त्वत्पादपङ्कजवनाश्रयिणः युद्धे जयं लभन्ते । तव पादपङ्कजे-त्वत्पादपङ्कजे, ते एव वनं त्वत्पादपङ्कजवनं, तस्य आश्रयः-शरणं येषां ते त्वत्पादपङ्कजवना-श्रयिणः । कथम्भूते युद्धे ? कुन्ताग्रभिन्नगजशोणितवारिवाह-वेगावतारतरणातुर-योधभीमे । कुन्तानां अग्राणि कुन्ताग्राणि तैर्भिन्नाश्च ते गजाश्च कुन्ताग्रभिन्नगजास्तेषां, शोणितो वारिवाहो-रुधिरमेघस्तेन यो वेगावतारो नदीप्रवाहः कुन्ताग्रभिन्नगज-शोणितवारिवाहवेगावतारस्तस्य तरणे-आतुराश्चपलाश्च ते योधाश्च कुन्ताग्रभिन्नगज-शोणितवारिवाहवेगावतारतरणातुरयोधाः, तैर्भीमं कुन्ताग्रभिन्नगजशोणितवारिवाहवेगा-वतारतरणातुरयोधभीमे । कथम्भूताः ? त्वत्पाद० ? विजितदुर्जयजेयपक्षाः, विशेषेण जितः दुर्जयो जेयपक्षो यैस्ते विजितदुर्जयजेयपक्षाः ॥३९॥

**अम्भोनिधौ इति** ॥ हे स्वामिन् ! भवतः स्मरणाद् अम्भोनिधौ रङ्गत्तरङ्गशिखरस्थितयानपात्राः त्रासं विहाय पारं व्रजन्ति । रङ्गन्तश्च ते तरङ्गास्तेषां शिखरेषु स्थितानि यानपात्राणि येषां ते रङ्गत्तरङ्गशिखरस्थितयानपात्राः । कथम्भूते अम्भोनिधौ ? क्षुभितभीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्नौ, क्षुभिताः-क्षोभं प्राप्ता ये भीषणाः नक्रचक्रपाठीनपीठाः-क्षुभितभीषणनक्रचक्रपाठीनपीठा यत्र स क्षुभितभीषणनक्रचक्रपाठीनपीठः । तथा भयदोल्बणः प्रकटो वाडवाग्निर्यत्र स भयदोल्बणवाडवाग्निः, क्षुभितभीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्निः तस्मिन् ॥४०॥

**उद्भूतेति** ॥ हे जिन ! मर्त्या त्वत्पादपङ्कजरजोमृतदिग्धदेहाः । पूर्वं ईदृशा अपि मकरध्वजतुल्यरूपाः कन्दर्पसदृशरूपाः भवन्ति तव पादपङ्कजं त्वत्पादपङ्कजं तस्य रजः त्वत्पादपङ्कजरजः तदेव अमृतं त्वत्पादपङ्कजरजोमृतं तेन दिग्धः-सिक्तः देहो येषां ते त्वत्० । मकरध्वजतुल्यं रूपं येषां ते मकर० । कथम्भूता मर्त्याः ? उद्भूतभीषणजलोदरभारस्तेन भुग्नाः वक्रा उद्भूतभीषण-जलोदरभारभुग्नाः । कथम्भूता मर्त्याः ? शोच्यां दशां उपगताः-प्राप्ताः । पुनः कथम्भूता मर्त्याः ? च्युतजीविताशाः, च्युता गता जीवितस्य आशा येभ्यस्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्युतजीविताशाः ॥४१॥

**आपादकण्ठ**मिति ॥ हे स्वामिन् ! त्वन्नाममन्त्रं अनिशं-निरन्तरं स्मरन्तः मनुजाः सद्यः स्वयं विगतबन्धभया भवन्ति । विगतं बन्धभयं येषां ते विगतबन्धभयाः । कथम्भूता मनुजाः ? आपादकण्ठमुरुशृङ्खलानि तैर्वेष्टितानि अङ्गानि येषां ते उरुशृङ्खलवे० । पुनः कथम्भूताः मनुजाः ? गाढं बृहन्निगड-कोटिनिघृष्टजङ्घाः । गाढं दृढं बृहन्ति च तानि निगडानि च बृहन्निगडानि तेषां कोटिभिरग्रभागे निघृष्टा जङ्घा येषां ते बृहन्निगडकोटिनिघृष्टजङ्घाः । विशाल अष्ठीलाप्रच्चरितजङ्घाः ॥४२॥

**मत्तद्विपेन्द्र** इति ॥ हे स्वामिन् ! यः मतिमान्-पण्डितः इमं तावकं स्तवं अधीते, तस्य मनुष्यस्य भिया प्रयाति । कथम्भूतं भयम् ? मत्तद्विपेन्द्र-मृगराजदवानलाहिसङ्ग्रामवारिधिमहोदरबन्धनोत्थं । मत्तद्विपेन्द्रश्च मृगराजश्च दवानलश्च अहिश्च सङ्ग्रामश्च वारिधिश्च महोदरश्च बन्धनं च मत्तद्विपेन्द्रमृगराजदवानलाहि-सङ्ग्रामवारिधिमहोदरबन्धनानि तेभ्यः उत्थं-प्रकटितं मत्तद्विपेन्द्रमृगराजदवानलाहि-सङ्ग्रामवारिधि-महोदरबन्धनोत्थम् ॥४३॥

**स्तोत्रस्रज**मिति ॥ हे जिनेन्द्र ! जिनानां सामान्यकेवलिनां इन्द्रः = जिनेन्द्रः तत्सम्बोधनं क्रियते हे जिनेन्द्र ! । यः मनुष्यः इह तव स्तोत्रस्रजं = स्तोत्रमालां कण्ठगतां सतीं अस्रजं(अजस्रं)-निरन्तरं धत्ते । तं मानवं लक्ष्मीः समुपैति-समागच्छति । कथम्भूतं तं ? मानतुङ्गं मानेन तुङ्गं मानतुङ्गम् । कथम्भूता लक्ष्मीः ? अवशा-निश्चला । कथम्भूतां स्तोत्रस्रजं ? गुणैः मया भक्त्या निबद्धां-रचितामित्यर्थः । पुनः कथम्भूतां स्तोत्रस्रजं ? रुचिरवर्णविचित्र-पुष्पां रुचिराश्च ते वर्णाश्च रुचिरवर्णास्ते एव विचित्राणि पुष्पाणि यस्यां सा रुचिरवर्णविचित्रपुष्पा तां रुचिरवर्णविचित्रपुष्पां, मनोहराक्षरकुसुमामित्यर्थः ॥४४॥

इति श्री भक्तामरकाव्यस्य सुखबोधिका वृत्तिः समाप्ताः ॥

—x—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्री विवेकचन्द्रगणि कृतम्

# भक्तामरस्तोत्र-पादपूर्ति आदिनाथ-स्तोत्रम्

सं. म. विनयसागर

यह कृति तपगच्छनायक श्री विजयदानसूरि के शिष्य उपाध्याय सकलचन्द्रगणि के शिष्य सूरचन्द्र के शिष्य श्री भानुचन्द्रगणि के शिष्य श्री विवेकचन्द्रगणि कृत है। इन्होंने विजयदानसूरि, विजयहीरसूरि और विजयसेनसूरि- इन तीन पीढ़ियों को देखा है और सेवा की है। जगद्गुरु आचार्य हीरविजयसूरिजी का अकबर पर अप्रतिम प्रभाव था और वह प्रभाव निरन्तर चलता रहे, इस दृष्टि से उन्होंने शान्तिचन्द्रगणि, भानुचन्द्रगणि इत्यादि को अकबर के पास रखा। स्वयं गुजरात की ओर विहार कर गये। भानुचन्द्रगणि का भी सम्राट पर बड़ा प्रभाव रहा। आचार्यश्री ने लाहोर में वासक्षेप भेजकर उनको उपाध्याय पद दिया था और अन्त में ये महोपाध्याय पदधारियों की गणना में आते थे। भानुचन्द्र के मुख से सम्राट अकबर प्रत्येक रविवार को सूर्यसहस्रनाम का श्रवण करता था। आइने-अकबरी में भी भानुचन्द्र का उल्लेख प्राप्त होता है। अकबर के मरण समय तक भानुचन्द्र उनके दरबार में रहे अर्थात् संवत् १६३९ से १६६० का समय अकबर के सम्पर्क का रहा।

भानुचन्द्रगणि व्युत्पन्न विद्वान् थे। भानुचन्द्रगणि का विशेष परिचय देखना हो तो उनके शिष्य सिद्धिचन्द्र कृत 'भानुचन्द्र चरित्र' अवलोकनीय है। महोपाध्याय भानुचन्द्र के अनेकों शिष्य थे जिनमें सिद्धिचन्द्र और विवेकचन्द्र प्रसिद्ध थे। विवेकचन्द्र भी प्रतिभाशाली विद्वान् थे किन्तु इस कृति के अतिरिक्त उनकी अन्य कोई कृति प्राप्त नहीं है। अतएव इनके जीवन कलाप का वर्णन करना सम्भव नहीं है।

स्वतन्त्र काव्यरचना से भी अधिक कठिन कार्य है पादपूर्ति रूप में रचना करना। पादपूर्ति में पूर्व कवि वर्णित श्लोकांश को लेकर किसी अन्य विषय पर रचना करते हुए उस पूर्व कवि के भावों को सुरक्षित रखना वस्तुतः कठिन कार्य है।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भक्तामर स्तोत्र श्री मानतुङ्गसूरिजी रचित है । भक्तामर और कल्याण मन्दिर ये ऐसे विश्व प्रसिद्ध स्तोत्र हैं जो कि आज भी श्वेताम्बर और दिगम्बर दोनों में मान्य है । श्वेताम्बर परम्परा ४४ पद्यों का स्तोत्र मानती है जबकि दिगम्बर परम्परा ४८ पद्यों का ।

पादपूर्ति दो प्रकार से होती है । एक तो सम्पूर्ण पद्यों के प्रत्येक चरण का आधार मानते हुए रचना करना और दूसरा पद्य के अन्तिम चरण को ग्रहण कर और भाव को सुरक्षित रखते हुए रचना करना । इस स्तोत्र के अनुकरण पर अनेक दिग्गज कवियों ने प्रचुर परिमाण में पादपूर्ति स्तोत्र और छाया स्तवन भी लिखें हैं जो निम्न हैं :-

१. नेमि भक्तामर स्तोत्र - भावप्रभसूरि
२. ऋषभ भक्तामर स्तोत्र - समयसुन्दरोपाध्याय
३. शान्ति भक्तामर स्तोत्र - लक्ष्मीविमल
४. पार्श्व भक्तामर स्तोत्र - विनयलाभ
५. वीर भक्तामर स्तोत्र - धर्मवर्धनोपाध्याय
६. सरस्वती भक्तामर स्तोत्र - धर्मसिंहसूरि
७. भक्तामर प्राणप्रिय काव्य - रत्नसिंह
८. भक्तामर पाद पूर्ति - पं. हीरालाल
९. भक्तामर पादपूर्ति स्तोत्र - महा० म० पं० गिरधर शर्मा
(इसके प्रत्येक चरण की पादपूर्ति की गई है)
१०. भक्तामर स्तोत्र छाया स्तवन - मल्लिषेण
११. भक्तामर स्तोत्र छाया स्तवन - रत्नमुनि

इस कृति के कर्त्ता विवेकचन्द्र ने श्री मानतुङ्गसूरिजी के भावों को सुरक्षित रखते हुए और उसको प्रगति देते हुए यह पादपूर्ति की है । इस पादपूर्ति स्तोत्र को देखते हुए कहा जा सकता है कि ये संस्कृत साहित्य के धुरन्धर विद्वान् थे और समस्यापूर्ति में भी भाग लेते थे । यह कृति रमणीय और पठनीय होने से यहाँ प्रकट की जा रही है । इसकी एकमात्र प्रति ही प्राप्त है, वह किसी भण्डार में है, इसका ध्यान नहीं । अतएव इस सम्बन्ध में क्षमा चाहता हूँ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# भक्तामरस्तोत्र-पादपूर्ति आदिनाथ-स्तोत्रम् ।

नम्रेन्द्रचन्द्र ! कृतभद्र ! जिनेन्द्र ! चन्द्र ! ज्ञानात्मदर्शपरिदृष्टविशिष्टविश्व ।
त्वन्मूर्त्तिरर्त्तिहरणी तरणी मनोज्ञे वालम्बनं भवजले पततां जनानाम् ॥१॥
गृह्णाति यज्जगति गारुडिको हि रत्नं, तन्मन्त्र-तन्त्रमहिमैव बुधो न शक्तः ।
स्तोतुं हि यं यदबुधस्तदसीय शक्तिः, स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥२॥
त्वां संस्मरंतहमरंकरभीप्सितस्य, दूरं चिरं परिहरामि हरादिदेवान् ।
हित्वा मणिं करगतामुपलं हि विज्ञ-मन्य क इच्छति जनः सहसा ग्रहीतुम् ॥३॥
ध्यानानुकूलपवनं गुणराशिपात्रं, त्वामद्भुतं भुवि विना जिन ! यानपात्रम् ।
मिथ्यात्वमत्स्यभवनं भवरूपमेनं, को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ॥४॥
क्षुत्क्षाम-कुक्षि-तृषिता-तप-शीत-वात-दुःखीकृताद्भुततनोर्मरुदेविमाता ।
अद्याप्युवाच भरतादिभवाङ्गनस्य, नाभ्येति किं निजशिशोः परिपालनार्थम् ॥५॥
मुक्तिप्रदा भवति देव ! तवैव भक्तिर्नान्यस्य देवनिकरस्य कदाचनापि ।
युक्तं यतः सुरभिरेव न रौद्रमारास्तच्चारुचूतकलिकानिकरैकहेतुः ॥६॥
गाङ्गेयगात्रनृतमस्तृणसत्त्रदात्रं त्वन्नाममात्र वसतो ? गुणरत्नपात्रम् ।
मिथ्यात्व याति विलयं मम हृद्विलीनं, सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥७॥
नेत्रामृते भवति भाग्यबलेन दृष्टे, हर्षप्रकर्षवशतस्तव भक्तिभाजाम् ।
वक्षःस्थलस्थित उतेक्षणतश्च्युतोसौ मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥८॥
श्रीनाभिनन्दन ! तवाननलोकनेन, नित्यं भवन्ति नयनानि विकस्वराणि ।
भव्यात्मनामिव दिवाकरदर्शनेन, पद्माकरेषु जलजानि विकाशभाञ्जि ॥९॥
त्वत्पादपद्मशरणानुगतान्नरांस्त्वं, संसारसिन्धुपतिपारगतान् करोषि ।
निःपाप ! पारगत ! यच्च स एव धन्यो, भूत्याश्रितं य इह नात्मसमं करोति ॥१०॥
युक्तं त्वदुक्तवचनानि निशम्य सम्यक्, नो रोचते किमपि देव ! कुदेववाक्यम् ।
पीयूषपानमसमानमहो विधाय, क्षारं जलं जलनिधेरसितुं क इच्छेत् ॥११॥
शम्भुः स्वकीयललनाललिताङ्गभागो, विष्णुर्गदासहितपाणिरितीव देव ! ।
प्रद्वेषरागरहितोऽसि जिन ! त्वमेव, यत्ते समानमपरं न हि रूपमस्ति ॥१२॥
तेजस्विनं जिन ! सदेह भवन्तमेव, मन्येस्तमेति सवितापि दिवावसानम् ।
दीपोऽपि वर्त्तिविरहे विधुमण्डलं च, यद्वासरे भवति पाण्डुपलाशकल्पम् ॥१३॥
ये व्याप्नुवन्ति जगदीश्वर ! विश्व ! विश्वमत्राङ्गनानपि सृजन्तितरां विलोक्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वां भास्करं जिन ! विना तमसः समूहान् कस्तान्निवारयति संचरतो यथेष्टम् ॥१४॥
सिंहासनं विमलहेममये विरेजे, मध्यस्थित-त्रिजदीशश्वरमूर्तिरम्यम् ।
नोद्योतनार्थमुपरिस्थितसूर्यबिम्बं, किं मन्दराद्रिशिखरं चलितं कदाचित् ॥१५॥
दोषाकरो न सकरो न कलङ्कयुक्तो, नास्तं गतो न सतमानसविग्रहो न(?) ।
स्वामिन्विधुर्जगति नाभिनरेन्द्रवंश-दीपोपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥१६॥
नित्योदयस्त्रिजगतीस्थतमोपहारी, भव्यात्मनां वदनकैरवबोधकारी ।
मिथ्यात्वमेघपटलैर्न[स] मावृतो यत्सूर्यातिशायिमहिमासि मुनीन्द्र ! लोके ॥१७॥
लावण्य-पुण्य-सुवरेण्य-सुधानिधानं, प्रह्लादकं जनविलोचनकैरवाणाम् ।
वक्त्रं विभो तव विभाति विभातिरेकं विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥१८॥
ध्यातस्त्वमेव यदि देव ! मनोभिलाष-पूर्णीकरः किमपरैर्विविधैरुपायैः ।
निःपद्यते यदि च भौमजलेन धान्यं, कार्य्यं कियज्जलधरैर्जलभारनम्रैः ॥१९॥
माहात्म्यमस्ति यदनन्तगुणाभिरामं, सर्व्वज्ञ ! ते हरिहरादिषु तल्लवो न ।
चिन्तामणौ हि भवतीह यथा प्रभावो, नैव तु काचकशले किरणाकुलेपि ॥२०॥
तद्देव ! देहि मम दर्शनमात्मनस्त्वमत्यद्भुतं नृनयनामृतमत्र दृष्टे ।
स्वामिन्निहापि परमेश्वर ! मेऽन्यदेव ! कश्चिन्मनो हरति नाथ भवान्तरेपि ॥२१॥
ज्ञानस्य शिष्टतरदृष्टसमस्त लोका-लोकस्य शीघ्र हतसंतमसस्य शश्वत् ।
दाता त्वमेव भुवि देव ! हि-तं (?) प्राच्येव दिग्जनयति स्फुरदंशुजालम् ॥२२॥
सिंहासनस्थभवदुक्तचतुर्विधात्म-धर्मादृते त्रिजगदीश ! युगादिदेव ! ।
सद्दानशीलतपनिर्मलभावनाख्यान् नान्यः शिवः शिवपदस्य मुनीन्द्र पन्थाः ॥२३॥
स्वामिन्ननन्तगुणयुक्त कषायमुक्त साक्षात्कृतत्रिजगदेव ! भवत्सदृक्षाः ।
नान्ये विभङ्गमतयो रुचिरं च पञ्च ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥२४॥
चिन्तामणिर्मणिषु धेनुषु कामधेनु-र्गङ्गा नदीषु नलिनेषु च पुण्डरीकम् ।
कल्पद्रुमस्तरुषु देव यथा तथात्र व्यक्तं त्वमेव भगवन् पुरुषोत्तमोऽसि ॥२५॥
भास्वद्गुणाय करणाय मुदो रणाय, विद्याचणाय कमलप्रतिमेक्षणाय ।
पुंसां छलेन पतितं पुरतो हि रत्र दृष्येत किं नियतमंतर तत्त्वदृष्ट्या ।
मोहावृतेन मयका त्वयि संस्थितेग्रे, स्वप्नान्तरेपि न कदाचिदपीक्षितोषि ॥२७॥(?)
मन्मानसांतरगतं भवदीय नाम पापं प्रणाशयति पारगत ! प्रभूतम् ।
श्रीमद्युगादिजिनराज हिमं समन्ताद्, बिम्बं रवेरिव पयोधरपार्श्ववर्त्ति ॥२८॥
जन्माभिषेकसमये गिरिराजशृङ्गे, प्रस्थापितं तव वपुर्विधिना सुरेन्द्रैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रोद्योतते प्रबलकान्तियुतं च बिम्बं, तुङ्गोदयाद्रिशिरसीव सहस्त्ररश्मेः ॥२९॥
केशच्छटां स्फुटतरां दधदंशदेशे, श्रीतीर्थराज ! विबुधावलिसंश्रितस्त्वम् ।
मूर्धस्थकृष्णलतिकासहितं च शृङ्ग-मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥३०॥
स श्रीयुगादिजिन ! मेभिमतं प्रदेहि धर्मोपदेशसमये दिवि गच्छदूर्ध्वम् ।
ज्योतिर्दतां(?) जयति यस्य शिवस्य मार्गं, प्रस्थापयत्त्रिजगतः परमेश्वरत्वम् ॥३१॥
सोपानपंक्तिमरजांसि भवद्वचांसि, स्वर्गाधिरोहणकृते यदि नो कथं तत् ।
तत्राश्रिता त्रिजगदीश्वर ! यान्ति जीवा, पद्मानि तत्र विबुधा परिकल्पयन्ति ॥३२॥
भाति त्वया भुवि यथा न तथा विना त्वां, श्रीसंघनायकगुणैः सहितोपि संघः ।
शोभा हि यादृगमृतद्युतिना विना तं, तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ॥३३॥
त्वत्स्कन्धसंस्थचिकुरावलिकृष्णवह्नि वक्त्रस्फुरद्विषनिजाक्षिविनिर्यदग्निः ।
सर्पोपि न प्रभवति प्रबलप्रकोपे, दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥३४॥
संप्राप्तसंयमदरीवसनं प्रलब्धं, पुण्यौषधं परमशर्म्मफलोपपेतम् ।
मर्त्यं महोदयपते भववैरिवृन्दं, नाक्रामति क्रमयुगाचलसंश्रितं ते ॥३५॥
धर्मे धनानि विविधानि न नादहन्तं, मानुष्यमानसवने नियतं वसन्तम् ।
दीप्यत्तरं स्मरसमीरसखं वृषाङ्कः त्वन्नामकीर्त्तनजलं समयत्यशेषम् ॥३६॥
यत्रोद्गता शितिलताहिगिरेर्गुहायां, किं तन्न तिष्ठति फणी गुणगेह ! तस्मात् ।
मिथ्यात्वमेतदगमन्नितरामुवष्ट । त्वन्नामनागदमनी हृदि यस्य पुंसः ॥३७॥
पीडां करोति न कदापि सतां जनानां, सूर्योदयादमृतसूः सरसीरुहाणाम् ।
दुःखीकृतं त्रिभुवनो विपदां च यस्य, त्वकीर्त्तनात्तम इवाशु भिदामुपैति ॥३८॥
त्वद्वाणिमञ्जुलमरन्दरसं पिबन्तस्तापोप्सिता परमनिर्वृतिमादिदेव ! ।
पुण्याढ्य पञ्च जनचञ्चुरचञ्चरीक-स्त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥३९॥
कन्दर्पदेवरिपुसैन्यमपि प्रजीत्य त्वल्लोहकारकृतमार्गसुवर्म्मिताङ्गाः ।
देव ! प्रभो ! जय जयारवभङ्गभीरास्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥४०॥
त्वत्पादपद्मनखदीधितिकुंकुमेन चित्रीकृतः प्रणमतां स्वललाटपट्टः ।
येषां त एव सुतरां शिवसौख्यभाजो, मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥४१॥
भग्नेव कर्मनिगडं जिन लोहरकारवाङ्मुद्गरेण भवगुप्तिगृहासवासाः ।
कर्मावलीनिगडिता अपि भक्तसत्त्वा, सद्यः स्वयं विगतबन्धभया भवन्ति ॥४२॥
रोषो दिवेति सहगामपहाय माम-सौ सम्पदाभिरमते सह मत्सपत्न्या ।
द्राक्चक्रवालमगमद्विदेव(?) तस्य यस्तावकं स्तवमिमं मतिमानधीते ॥४३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्याङ्गणे सुरतरुस्सुरधेनुरंह्री(?), चिन्तामणिः करतलं निजमन्दिरञ्च ।
यः श्रीयुगादिजिनदेवमलं स्तवीति, तं मानतुङ्गमवशा समुपैति लक्ष्मीः ॥४४॥
श्रीमन्मुनीन्द्रवरवाचक-**भानुचन्द्र** ! पादाब्जसेवक-**विवेकनिशाकरेण** ।
भक्तामरस्तवनतुर्यपदैः समस्याकाव्यैः स्तुतः प्रथमतीर्थपतिर्गृहीत्वा ॥४५॥[१]

***॥ इति भक्तामर-समस्या-स्तवन श्रीमदादीश्वरो वर्णितः ॥***

C/o. प्राकृत भारती
13-A मेन मालवीय नगर,
जयपुर ३०२०१७

१. अशुद्धप्रायः यह सम्पादन है । मूल प्रति हमारे सामने नहीं है । अतः जितना हो सका उतना सुधार दिया । बाकी सम्पादनकर्ताने भेजा वैसा ही पाठ प्रकाशित हो रहा है । पद्य २६ का उत्तरार्ध नहीं है ।

-शी.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# भवनभूषण-भूषणभवन काव्य

- सं. उपा. भुवनचन्द्र

अमारा संग्रहमांनी एक अपूर्ण प्रतिमांथी मळेलुं आ चमत्कृतिसभर काव्य अपूर्ण छे- त्रुटित छे. ११ पत्रनी प्रतना प्रारम्भना पांच पत्र नथी. रचना अष्टक प्रकारनी छे पण आठ-आठ श्लोकोनुं बन्धन कविए स्वीकार्युं नथी. चोथा अष्टकनो अन्तिम श्लोक मळे छे जे नवमो छे. अष्टक ५, ६, ७मां नव-नव श्लोक छे. आठमा अष्टकमां आठ श्लोक पूरा थया पछी फरी एकथी नव श्लोक आप्या छे, ते पछी आठमुं अष्टक पूरुं थाय छे. त्यार बाद बे श्लोक छे जेमां कविनी गर्वोक्ति छे.

प्रत शुद्ध करेली छे. अक्षरो मरोडदार अने विशाल छे. लाल अने काळी - एम बे शाहीनो उपयोग थयो छे. ज्यां ज्यां लहियानी भूल थई छे तेवा स्थाने संमार्जन थयेलुं छे. पदच्छेद, संशोधन तथा टिप्पण सूचववा माटे सम्पूर्ण प्रतमां लिपिचिह्नो छूटथी वपरायां छे. प्राचीन लेखनपद्धतिमां लिपि चिह्नोनो प्रयोग कई रीते थतो हतो ते समजवा आ प्रति एक नमूनानुं काम आपे एवी छे.

कोईक विद्वान मुनि अथवा पण्डिते काव्यना कठिन शब्दो, कूटस्थानो वगेरेनुं स्पष्टीकरण करतां टिप्पणो लख्यां छे. शाही उखड़ी जवाथी क्यांक क्यांक शब्दो पूरा वंचाता नथी अथवा अस्पष्ट वंचाय छे. प्रति सोळमा शतकनी जणाय छे.

कृतिना रचयिता **वाचक साधुहर्ष** छे. अन्तिम श्लोकमां कर्ता कहे छे के **विद्वान लक्ष्मण**ना अनुरोधथी, **सुमतिलाभ** माटे **साधुहर्षे** आ रचना करी, कर्ताना गुरु, गच्छ के समयनो निर्देश प्रतमां के कृतिमां नथी. कर्ता तथा कृतिना रचनाकाल विशे विशेष तपास थई शकी नथी.

कृतिना अन्ते 'भुवनवर्णने भवनभूषणे भूषणभवने' एवो उल्लेख छे तेथी 'भवनवर्णन' एवुं नाम मानी शकाय परंतु प्रत्येक अष्टकना अन्ते 'भवनभूषणे भूषणभवने' ए ज लखेलुं छे, तेथी ए नाम वधु योग्य लागे छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काव्यनो विषय श्री नेमिकुमारना लग्ननो प्रसंग छे. मुख्यत्वे नेमिकुमार तथा नेमिकुमारनो महेल- ए बन्नेनुं वर्णन एक साथे थाय तेवी द्व्यर्थक रचना छे परन्तु राजीमती, द्वारिका, रैवताचल आदिनुं वर्णन पण आमां सामेल छे.

चित्रकाव्य होवाथी एकाक्षर, द्व्यक्षर, छत्रबन्धादि बंध, श्लेष, यमक, वगेरे आ काव्यमां प्रचुर रीते प्रयोजाया छे. अनेकार्थक श्लोको, प्रहेलिका अने शब्दचातुरी पण एटला ज प्रमाणमां जोवा मळे छे. शब्दचातुरीनो एक नमूनो - (अ. ४, श्लोक ९)

''रम्यवदना राजीमती, तारा वरनुं नाम बहु सुंदर छे, ते मने कहे ने !'' - सखी.

''शैवेय'' - राजीमती.

''एटले शिवानो पुत्र ने ? तो शुं ए गणपति छे के पछी शियाळ छे ?'' - सखी. (शिवा = दुर्गा, तथा शिवा = शियाळी)

''नहि, नहि, आयुष्मती, ए तो माधवना बन्धु छे'' - राजीमती.

''कृष्णना बन्धु एटले हलधर बलराम ज ने ?''

''ना, ना, नेमि'' - राजीमती

''तो शुं चन्द्र छे ?'' - सखी.

- राजीमतीनी सखीओनी वरसम्बन्धी आवी शब्दलीलावाळी वाणी शोभी रही छे.''

अहीं श्लोकमां चन्द्र माटे कवि 'चमाः' शब्द वापरे छे. टिप्पणमां आनो अर्थ 'हिमकर' अर्थात् चन्द्र दर्शाव्यो छे. आ शब्द कोशमां जडतो नथी. आवुं केटलुंक कविसम्प्रदायथी ज जाणी शकाय. कूटकाव्य/चित्रकाव्य होवाथी रचना यद्यपि क्लिष्ट छे तो पण बुद्धिने चमत्कृत करनारी होवाथी रसप्रद बने छे. कविनी विद्वत्ता, कल्पनाशक्ति, शब्दसमृद्धि, रचनाचातुरी काव्यमां झळहळी रहे छे. अन्तिम श्लोकमां कवि स्वयं कहे छे :-

''(आ काव्य वांचीने) ईर्ष्याळुनुं मुख वक्र थशे अने मन्दमतिवाळानी काया संकोच पामशे.'' अर्थात् शरम अनुभवशे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजसभाओमां पाण्डित्यप्रदर्शनना युगमां आवी रचनाओ करवानी कविओने प्रेरणा मळती. प्रस्तुत रचना पण आवी कोई स्पर्धा साथे जोडायेली होय अथवा पोताना शिष्य आदिना विनोद अर्थे पण कदाच रचाई होय.

काव्य अने तेना कर्ता विशे वधु विगतो कोई विद्वज्जन रजू करशे तो आनन्द थशे.

★ ★ ★

'रम्यं ते वरनाम वामवदने राजीमति ! ब्रूहि मे ?'
'शैवेयः' 'किमु पर्शुपाणिरथ किं गोमायुरायुष्मति ! ?'
'नो, श्रीमाधवबान्धवः' 'किमु हली ?' 'नो नेमिराले' 'चमा?'[१]
इत्थं राजि[२]मतीवरसखीवररतिं[३]श्रीभारती राजते ॥९॥*

इति श्रीभवनभूषणे भूषणभवने चतुर्थाष्टकम् ।

[५]

न खगतिश्च कवर्गगतिस्तव
करगतिर्नरनायकसङ्गतेः ।
सुजलशङ्ख इयाय महागतिं
स्तुतिविधायक एष्यति तद् घनाम् ॥१॥ द्रु०

श्रीमन्तौ मुनिचारुशब्दनिकरं सम्यग् ब्रुवन्तौ स्थिरा
अङ्गस्त्री महती महावसुमती साराङ्गराजीमती ।
श्रीमत्सौर्यपुरे महोत्सवजनी श्रीद्वारकावासिनौ
राजेते वरपुष्पगन्धमहिता आवाँसनेमी उभौ ॥२॥ शार्दू०

१. हिमकरः । २. राजी तथा राजिरिति रूपद्वयेन न दोषः । राजिमतीपतिदग्धरतीशतद्गुरुतां..... इति श्रवणाच्च तथात्र ह्रस्वेन तनुह्रस्वताकरणं ज्ञेयमिति व्यङ्ग्यम् । ३. भर्तृक्रीडा तस्या श्रीभारती । ४. अजाद्यन्तत्वात् पूर्वनिपातः । * इत्थं राजिमतीसखीवररति० आम पाठ होय तो छन्दोभङ्ग थतो अटकी शके.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजच्छङ्खो[५] महेशो मलयजमहितो रम्यभूमध्यवासो
जैनो नानाप्रबन्धः शयसितकमलः[६] कामिनीगीतगीतः ।
रम्योद्वाहे सुवाहे ध्वजगजनिवहे पद्गरथ्याधिपत्ये
सच्छ्रीसर्वेक्ष्यमौलिर्विमलचमरयुक् छत्रितोऽयं विभाति ॥३॥ स्रग्धरा०

नेमेः पर्यस्तिकायाः किमुत वरहरेः पाणिसंस्थः सुकम्बू
रूप्यौघो मौक्तिकाप्तः किमुत सुजलधेः[७] फेनपिण्डोऽप्यखण्डः ।
किंवा कर्पूरपूरातिसुरभिमलयप्रोद्भवप्रासशामा
वामोरुस्थूलमूलोद्धतकुचकलसो[८] वा सतां सूपदेशः[९] ॥४॥ स्रग्धरा०

ऐन्द्रो हस्तीह वोच्चैः किमुत हिमनगोनग्रलब्धौ[१०]रंकीर्तेः
पुञ्जो[११] दातुर्गिरीशप्रकटवृषभको मूर्तिमज्जैनधर्मः ।
स्थाणुः स्थाणोर्विभूतिप्रचुरभगिरिजोरोज इन्द्रस्सुहांसो (?)
हासो वा श्रैधरास्यः किमुत विमलभावासरसां राशिवासः ॥५॥ स्रग्धरा०

ऊहे तं (?) पक्षिराजः किमुत शशिहयो-य इन्द्रस्य सम्यङ्
मन्ये गाने मुनी द्वौ किल निजशिरसी घर्षयन्ताविति द्वौ ।
नायं नायं न चायं ह्ययमय मयकं नायमेषो यमेष
नायं नायं न चासावयमयमयकं श्रीवरावास एव ॥६॥

श्रग्धराछन्दांसि । त्रिभिर्विशेषकम् ।

सा-र्थं नै(नौ?)म्यहं नेमिं सार्थं नत्वा सदा नमिम् ।
श्रीशादारं(?) नरैभावं श्रीमत्सदर्थभानवम् ॥७॥

श्लोकः । छत्रबन्धचित्रम् ।

नेतारं वा तारं गाने नेमिं भा आदानं मेने ।
श्रीआवासं शोभासारं श्रीदातारं देवैः सारम् ॥८॥

विद्युन्माला । द्वितीयछत्रबन्धचित्रम् ।

---

५. पाञ्चजन्यः, मङ्गलार्थं ध्वनिः । ६. शये हस्ते सिता उज्ज्वला कमला लक्ष्मीर्यस्य स शय०; शये शयने सितानि कमलानि यत्र स शय० । ७. क्षीरसमुद्रस्य । ८. कुचकलसेतिकरणात्पुनरु-रोनेतिकरणे न दोषः । वा पुनः करणं देवमनुष्यवशाविशेषख्यापनार्थमिति । ९. सुकथनं १०. गति । ११. तथात्रौघवृन्दपुञ्जराशि इत्येतयोरेकार्थत्वात् पूर्वपदभिन्नत्वात् अत्रादोषता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेवा देया यादेवासे नेमे देवं वन्देऽमेने ।
त्वामस्त्रि नानास्त्रि मत्वा सारांगातोतो गारांसाम् ॥९॥ विद्युन्माला ।

आज्ञाज्ञातश्च दारासो मण्डने ज्ञोस्य मूलतः ।
आज्ञाज्ञातश्च दारासो मण्डनेऽज्ञोस्य मूलतः ॥१०॥ अनुष्टुप् ।

इति श्री भवनभूषणे भूषणभवने पञ्चमाष्टकम् ।

६ । अथ पूर्वर्णनम् ।

पूरत्तादृत एव वेत्ति न परश्चार्यागतिं सुन्दराम्
मात्रामत्रमनन्तसिद्धिफलदं दूराय नांह्रीयुतम् ।
चार्यागत्युचितादशेषरहिता निश्शेषमौलिस्थितात्
पात्रापात्रविशेषचेतिति परापूर्वप्रणीतात्स्फुटम् ॥२॥ शा० ॥

पूःपूर्वेव परा परापदहतिप्राणिव्रजे सद्दया
सूर्याद्या सुरमण्डलीस्वरुचिराचार्षिका कर्षिका ।
नित्योदारविभाजनाहतभया भव्यावलीमण्डिता
भातीह प्रबला बला बलवती श्रीनाथनेमीशतः ॥३॥ शा० ॥

श्रीतोया दवदग्धिकासुगुणगुः प्राकारसीमाभया
नानानारदवर्त्तिकाऽर्जुनकथा वा कोपलक्ष्याक्षया ।
तापी पाति परीक्षिता हयगजा श्री औजयंती ह्यतः
सूर्याधा नगरी विभाति सततं श्रीद्वारकेव स्फुटम् ॥४॥ शा० ॥

प्रसरशिशिरभावा माधवश्रीस्वभावा
स्वपतिमिलनतापा द्रव्यवर्षाप्रतापा ।
सुहृदुदयसरिद्भा जन्मवेलैकसद्भा
सघनभवनधन्या भाति पूराजकन्या ॥५॥ मालिनी ॥

उच्चाधोगुणनां कुतूब(ह?)लसरत्प्राणेह सोस्नेहदां
भूयो लोकविवासरो लघुसृतिप्रक्षीणराजत्कटीम् ।
नाभीकूपसुरोमवल्लिपलिदां तत्स्तूपनृत्यत्कुचां
रम्यास्यामयमाप पापरहितां नारीमिवैव क्षमाम् ॥६॥ शा०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दध्युज्ज्वलाभेन यका तवाङ्केऽदे-स्ति नो इष्टगृहे ग्रहे च ।
यद्भूतिमद्गर्ज्जघ्रणेस्थित-किं सा शुनो नो रथयायिनश्के ॥७॥ इन्द्रवज्रा ।

अव्यक्तशब्दव्रजपूर्वकेतिः सन्नीतिमार्गप्रवणः पुराणः ।
सर्वप्रियप्रेतिविनाशहेतु-र्मेघो यथा मेघद एष भाति ॥८॥ इन्द्रवज्रा ।

लात्वे मां पृतनां विमुच्य परमां रामां च कामागमा
गर्जद्गर्जहयोदयध्वजरथा सत्पद्गतुर्यव्रजाम् ।
प्रीतां भावभृतां सतीं दुरितराट्संपीडनात्खण्डितां
प्रापावासविभुर्दयां वसुमतीराजीमतीतापदाम् ॥९॥ शार्दू० ।

इति श्रीभवनभूषणे भूषणभवने षष्ठाष्टकम् ।

पूरामा त्वयका विना च सहसा त्यक्तास्यहास्यानघ
स्वाभां स्वापदवीक्षणाद् हिमयुतां श्रीहीरिकां मुञ्चता ।
उच्चैः स्थापितबाहुकोमलकरां साराङ्गराजीमतीं
श्यामां चारुदतीं सतीं वरमहे हूहूपुरासुन्दरे ॥१॥ शा० ।

**आचार**रीतिं स्वकुलस्य चक्रे
**वैवाहप्रज्ञप्ति**निवेदकायः[१२] ।
**श्रीसूत्रकृत्सद्व**चसा मुदेऽस्य-
**स्थानादरौघं[१३] वरदान**विधानसत्कः ॥२॥ इन्द्र० ।

**ज्ञाताप्रवृ**त्तेरथ चोग्रसेन
**उपासक**स्याशुदशार्हकस्य ।
पूर्वैरिदे**हान्तकरः** स्थिराङ्गः
**सानुत्तरः प्रश्नविपाक**दर्शी ॥३॥ युग्मम् ॥ इन्द्र० ।★

भवति भवत ईतेर्नाश आशून्नतेश्च
बलपरभवसिंहे वह्निरात्रौं[१४]स्वरूपः ।
भवनभवननाथ प्रोल्लसल्लोकगाथः
विशद-दशवामिर्मा भवावो नवामः(?) ॥४॥

---

१२. विसर्गो चित्रभङ्गाय न । १३. समवायः ।

★ २-३ पद्योमां ११ अङ्ग-आगमोनां नामो वणी लेवायां छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अखिलभुवननामन् वर्णनीयौ-धामन् (?)
त्रिदशपतिनतांह्रे मुक्तिजाने सुवर्ह ।
मतिधृतिगुणपूर्णस्फारतौसद्वयाणः
जगति महति लोकैः श्लोकगाथाभिरीक्ष्यः ॥५॥

सयमममनतौ ते त्वन्तरङ्गी श्वदेव
दलितदुरिततापो वायुवाङ्गोऽङ्गचित्तम् ।
निजधृतिजितवायू* तोयमारात्यहंजित्
भवजलतरनावा श्रेयसामावकायम् ॥६॥

मालिनीछन्दांसि । त्रिभिर्विशेपकम् ।

श्री ञ्ञ रूपा ३ अ-ावो[१५] इउऋतृ(लृ)[१६]उदितिर्मे नतिः प्राणिनाथ
मां सत्संयोगयोगां जगदसुमदनोऽमन्मनाः श्रीजनासः ।
हे ए ऐं ऊ च ऊ रेहि तितउसदृशं संप्रबोध्याशु वध्वा
गन्त्री गन्त्रीव भूत्वा स्यवसनमदने नानये चेदनायम् + ॥७॥ स्रग्धरा

सेवकः शेखरः सादरं सागरः शङ्करः पावनं भूघनो भूतलम् ।
आदिवर्णैर्विनेमानि वस्तूनि मे त्वां विना दौर्जलो भस्मनि प्राणिनि ॥८॥
स्रग्विणी

गोपतेर्दौर्जनं[१७] श्चायसो हाडिकं सन्ति सन् सद्हृदः साम्प्रतं मत्प्रिय ! ।
मां विना ते समानीह तानि प्रभो ! तत्प्रभोस्तैः प्रशस्यास्य हास्यानघः ॥९॥
स्रग्विणी

इति भवनभूपण-भूषणभवने ससमाष्टकम् ।

---

१४. आं त्रीति आत्रः, आत्रश्चासावों च आत्रौं, आत्रौंस्वरूपः – लक्ष्मीपप्रणवसहज इत्यर्थः । १५. उ खेदे । १६. इ उ ऋ तृ (लृ) इति ह्रस्वाक्षरप्रमाणा उदितिरूर्ध्वगतिर्यस्य स इउऋतृ(लृ) उदितिर्वा इउऋतृ(लृ) वर्णैः उदितिरूर्ध्वगतिर्यस्य स मध्यमपदलोपी समासः । ★ चित्तविशेपणं । + नय एव नायो नयमार्गः स्वार्थे, ततो नास्ति नायो यस्य सोऽनायोऽनयी इत्यर्थः, तं तथा, वा नास्ति आयो लाभो यस्य [सोऽनाय] स्तं तथा । १७. कीदृशं वनं दौर्ज्जनं दुर्जनानामिदं दौर्जनं वा दुर्जनाः सन्ति अत्र दौर्ज्जनं । अस्त्यर्थेऽण् । कीदृशं दरं भयं गर्त्तो वा 'गर्ते दरस्त्रिपु भयो दरोऽस्त्रिया'मिति **यतीन्द्रः** । दुर्जनानामिदं दौर्ज्जनं दरं, चकारादस्याप्येतदेव विशेषणं ज्ञेयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

८

पट्टनपत्तनसारनिवासः सेवकसेवकनुत्यावासः ।
मोदक मोदक शोभनिवासो यच्छति यच्छति सं घनिवासः[१८] ॥१॥
तोटकम्

वरभविमलनाथं दूरतस्त्वाविशेषं[१९]
लघुतरकरणाद्वा पण्डिताः खण्डितास्ते ।
वरभविमलनाथं दूरतस्त्वाविशेषं
लघुतरकरणाद्वा पण्डिताः खण्डितास्ते ॥२॥

अथ श्रीपतिवर्णनम् ।

अर्हत्सेवी जगद्वन्द्यः श्यामवर्णविराजितः ।
नरसिंहः सदानन्दः श्रीपतिर्जयति ध्रुवम् ॥३॥ अनेकार्थमनुष्टुप् छन्दः ।

नृपाख्यादौ वशाकृतिः (श्रीः)
कः[२०] कुर्यात्ससुखं पुरम् । (पतिः)
ब्रह्मचारिशिरोमौलि-यतीड्यः श्रीपतिश्च सः ॥४॥ अनुष्टुप्

---

१८. सं सुखे यच्छति सति घनिवासः । शरीरिणो वासो वस्त्रं यच्छति । १९. हे नाथ त्वामिति । त्वां ते पण्डिताः वरभ-विमलनाथं लघुतरकरणाद्विदुः अतः कृष्णात् विशेषं यथा स्यात्तथा मलनाथमित्यर्थः । कस्मात् लघुतरकरणादर्थान्म त्यजनात् । हे विमल, विगता मा येषां ते विमास्तान् लाति विमलस्तस्य नाथस्तं, दलिद्राधि-पतिमित्यर्थः । पुनर्वरभ० वरभाश्च ते वयश्च वरभवयस्तेषां बलं अनिष्टशब्दत्वान्मलेत्यस्य कथनं वरभविमलं तस्य नाथस्तं । विदूरतो विशेषदूरस्थाः, कीदृशास्ते ? ते पण्डिताः । पण्डिताः खण्डिताः पण्डितैः आ इति खेदे, खण्डिताः सुदोषीकृताः वा पण्डितासा पण्डितासनेन खण्डिताः । पण्डिताः खण्डिताः । वा आपं । आं पाति आपः कृष्णस्तं आपं । डो व्यञ्जनं डकारव्यञ्जनं, तेन इता गता डिता इत - - - रहिता इत्यर्थात्कृष्णं गता इत्यर्थः । पुनः विशेषं खण्डिताः । तु पुनः, आ समन्तात् । अस्य वा विशेषो यत्र तदाविशेषं यथा स्यात्तथा । ते । ते तव पण्डिता - इति त्वां हे वर हे भ, विमलनाथं लघुतरकरणात् जितेन्द्रियत्वात् । पुनर्लघुतरकरणात् ऊकारस्य ह्रस्वीकरणात् विदुः । कीदृशं नाथं - - विमलनाथं । २०. अग्रस्थकश्रवणादत्र केतिपदग्राह्यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ काचित् सुजनशि [क्षा । (?)]

सत्केशमो(मौ)ली रतिरूपरम्या नामाभिरामा मितहर्षकामा ।
उच्चैस्तनद्वन्द्ववतीह रामा पुण्यं विना नो भवता च लभ्या ॥५॥
इन्द्रवज्रा

सम्पद्विपत्प्राप्त्यविमुक्तसङ्गा वादेऽविवादा[२१] सरुषीतिरोषा ।
सुप्ते तु सुप्तोत्थित[२२] उत्थितैव छायेव मोच्या न वशा स्वका शैः ॥६॥
इं०

लब्धोदया षट्सुखे[२३]मावहन्ती नीलाम्बरा स्वस्य गणे प्रधानम् ।
मध्याग[२४]रम्या रमणीयशब्दा नारी तटीव प्रथमा न हेया ॥७॥ इं०

विस्मापितो या दयया तटिन्या सार्वैरपि प्राणपरैरलङ्घ्या[२५] ।
प्रीत्या स नेमिर्विपशून्[२६] विमोच्य सूर्यादिमां[२७] प्राप पुरं वरोयम् ॥८॥
इं०

अथ जिनोऽपि मनोभवभीतिभिद् वितरणं तरणाय च वार्षिकम् ।
सुविधिना[२८] विधिनामनिवारकः[२९] पशुविधौ[३०]वि★ विधाय शुभं[३१] ययौ ॥१॥

सुतरुतामसे[३२]तामरसावृतं सुमनसां[३३] मनसां सुखदायकम् ।
